ज्ञायतेऽत आह॥ ज्ञानदृशां स्वयमेवं प्रतीयसे॥ ज्ञायतेऽनेनेति ज्ञानं वेदान्तवाक्यजातं देव
दृक्दर्शनसाधने येषां तेषामिति संबंधसामान्यषष्ठी॥ तैरित्यर्थः॥ तादृशादृक्लाभश्च त्वद्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥रा·गी॥ ॥३॥

त्वधीनइत्याह॥ पादेति॥ त्वच्चरणकमलयोर्भृंगवदाहितः कृतः संगोयेनतादृशांतःकरण
संगवताम्· त्वच्चरणकमलसद्यन्यांतःकरणवतामित्यर्थः॥ ४ ॥अथप्रार्थयते॥ अहमि

प्रतीयसेज्ञानदृशांमहात्मनेपादाब्जभृंगाहितसंगसंगिनाम्॥ ४ ॥अहंप्रप
न्नोऽस्मिपदांबुजंप्रभोभवापवर्गंतवयोगिभावितम्॥

ति॥ भवस्यसंसारस्यापवर्गोनिवृत्तिर्यस्मात्तादृशंतवपदांबुजंप्रपन्नोऽस्मिशरणंप्रा
प्तोऽस्मियोगिभावितंयोगिभिःसंसारउच्छयेभावितम्॥ अनेनतस्यभवापवर्गत्वेसदा
चारःप्रमाणाउक्तम्॥ प्रार्थनीयमाह॥ अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणंयथा ॥राम॥ ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुखमक्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय॥ अपारवारिधिमित्यनेन सपारप्रसिद्ध
समुद्रव्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता॥ ५ ॥ अथोत्तरमवतारयति॥ श्रुत्वे

यथांजसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथानुशाधि माम्॥ ५ ॥ श्रुत्वाऽ
थ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्नधीः॥ विज्ञानमज्ञानतमो
पशांतये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥ ति रामः सौमित्रिवचः श्रुत्वा॥ अथश
ब्दो वाक्यालंकारे तदा श्रवणाव्यवहितकाले एव प्रपन्नानां भक्तानामार्तिं संसारदुःखं हरतीति ना
हशः॥ प्रसन्ना प्रमादहीना भक्तानुग्रहपरा च धीर्यस्य॥ क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५ रा·गी॥ तमसस्तुपरस्तांनयेतदर्थम्॥ संक्षिप्तार्थः॥ श्रुतिभिः तमेवविदित्वातिमृत्युमेतीत्यादिश्रुतिभिःप्र
॥५॥ पन्नंतत्फलंकत्वेनबोधितंविज्ञानमात्मतत्त्वज्ञानमितिसामान्यतःप्रथमेप्राह्॥६॥
अथतादृशज्ञानप्राप्त्येक्रमेणवहिरंगान्तरंगसाधनान्याह्॥ आदाविति॥ स्ववर्णाश्रमेष्व

आदौस्ववर्णाश्रमवर्णिताःक्रियाः कृत्वासमासादितशुद्धमानसः॥

शास्त्रेणवर्णितायाःक्रियानित्यनैमित्तिकयज्ञदानादिरूपास्ताः कृत्वासमासादितशुद्धमान ॥राम॥
सःप्राप्तान्तःकरणशुद्धिः॥ तत्पूर्वमुपात्तसाधनः॥ तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि ॥५॥
शमदमादीनियेनतादृशः अनेनकर्मणांवहिरंगत्वंशमादीनामन्तरंगत्वंस्फुटमेवोक्तं॥ किंच

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शमदमवैराग्यपदार्थपर्यन्तं कर्मानुष्ठानमेवेति सूचितं । तेन सत्कर्मानुष्ठानं समाप्य तत्त्वकासं
न्यसेति यावत् आत्मलब्धये आत्मज्ञानाय तत्फलकायतत्त्वमस्यादिवाक्यार्थविचाराय सद्गु

समाप्यतत्सूर्वगुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥ ७ ॥ क्रियाश
रीरोद्भवहेतुरादृताप्रियाप्रियौ तौ भवतः सुरागिराः ॥

रुं श्रोत्रियं ब्रह्मनिष्ठमि
त्यादिलक्षणलक्षितं समाश्रयेत् ॥ सेवते ॥ अनेनजुन्यज्ञिवलेन स्वयमेव वाक्यार्थविचा
रः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥ संसारस्य भ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्च तत्का
रणाज्ञाननिवृत्तिमूलकत्वाद्ज्ञाननिवृत्तेश्च तत्त्वज्ञानैकसाध्यत्वात्तत्त्वज्ञानस्य च वेदान्तवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रा॰गी॥ चारसाध्यत्वात्तदर्थंगुरुंसमाश्रयेत्याह॥ क्रियेति॥ भवःसंसारश्चक्रवद्विपरिवर्त्तमानई
॥५॥ र्यतेकथ्यते॥ तदेवोपपादयति॥ आहताआदरहूर्वंपूर्वजन्मार्जिताक्रियाऽस्यतस्यशरीरोद्भव
स्यजन्मनोहेतुःतत्रजन्मनिगुरागिणोविषयाभिलाषवतः॥ तोशास्त्रप्रसिद्धौधर्मैतरौधर्माधर्मौ

धर्मेतरौतत्रपुनःशरीरकंपुनःक्रियाचक्रवदीर्यतेभवः॥ ८ ॥ ८ ॥

प्रियाप्रियौसुखदुःखजनकौभवतः॥ कस्यचिदधर्मस्यैवसुखलवप्राप्तिःकस्यचिद्धर्मस्य
वंकदाचिदपिस्पृष्टं॥ एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिःय ॥राम॥
थाचक्रेभ्राम्यमाणोऽधोभागःकदाचिदुपरिउपरितनश्चाधःपुनरुपरिपुनरधएवंजन्मक्रिययोर्ज ॥२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्जनकभावेन परिहृत्ति रितिवोध्यम् ॥ ८ ॥ तस्यचाज्ञानमेवमूलमित्याह ॥ अज्ञानमेवेति
अत्रविधौ संसारनिवृत्तिलक्षणो कर्त्तव्यऽर्थे तज्ज्ञानमेवमूलकारणात्वा दज्ञानहानमेवविधी
यते साधनत्वेनेतिशेषः ॥ ननुकर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशंक्याह ॥ विद्यैवज्ञानमे

अज्ञानमेवास्यहि मूलकारणं तज्ज्ञानमेवात्रविधौ विधीयते ॥

व तन्नाशविधौ मूलाज्ञाननाशने पटीयसी समर्था ॥ नकर्मसमर्थमितिशेषः ॥ यतस्तत्कं अज्ञा
नजं ॥ आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणो ज्ञानजन्यत्वं वोध्यं ॥ ननुतज्जन्य
स्यापि तन्नाशकत्वं वृश्चिककर्कद्यादौ दृष्टमित्याशंक्य तज्जन्यत्वं वा तन्नाशकत्वे प्रयोजकं किंतुस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरोधत्वमेवेत्याह॥ यत्नविरोधं तदीरितं नाशकत्वं कर्मित्यर्थः॥९ ॥अतस्त्वकर्मणा नाज्ञानहानिरि
त्याह॥ नाज्ञानेत्यादि॥ यतः कर्मणाविरोधाभावान्नज्ञाननाशो नापि रागनाशो वस्तुतः कर्मानुष्ठानात्
विशेषवतन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम्॥९ ॥नाज्ञानहानिर्नच
रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत्॥ ततः श्रुतः संसृतिरप्रवारिता तस्माद्
बुधो ज्ञानविचारवान्भवेत्॥ १० ॥ ततः सदोषं क्षयिफलत्वादिदोषविशिष्टं कर्मैवोद्भवे
त्॥ कर्मणाश्च ततः संसारस्य वेति न तु किं प्रत्याशा॥ ततस्तस्माद्बुधो विवेकी ज्ञानविचारवान्॥ ज्ञा
यतेऽनेनेति ज्ञानं वेदांतवाक्यं तद्विचारवान्भवेत्॥ १० ॥श्रीकृष्णाय नमः॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायाउवदतिसार्धेन॥ नन्विति॥ नन्
न्वितिशंकायां॥ यथाविद्यावेदमुखेनश्रुतिपुराणलक्षणेनब्रह्मविदाप्नोतिपरमित्यादिनापुरुषा
र्थसाधनमुक्ता॥ तथाउभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः॥ तथैवज्ञानकर्मभ्यांप्राप्यतेब्रह्म
नतुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम्॥ कर्त्तव्यताप्राणभृतः
प्रचोदिताविद्यासहायत्वमुपैतिसापुनः॥ ११॥ शाश्वतमित्यादिनाक्रियाऽपितत्साध
नत्वेनोक्ता॥ किंचक्रियाकर्त्तव्यतातृतीयार्थेप्रथमा कर्त्तव्यतयाआवश्यकेकृत्येअवश्यकर्त्तव्यः
तयाप्रचोदितानित्यनैमित्तिकरूपा॥ एवंचतदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात्॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मात्साधनविद्यायाः सहायत्वं प्राप्नोति घटे जननीये यथा दंडचक्रादीनां परस्परसहायता ॥ ११
कर्त्तव्यमेतिस्वोक्तमेव विवृणोति ॥ कर्मेति ॥ वीरहावाऽस्षदेवानांयोग्निमुद्वासयते यावज्जीवमग्नि
होत्रं जुहोतीति श्रुतिः ॥ नन्वसिद्धांनीशंकते ॥ नन्विति ध्रुवं स्थिरं कार्यमिदं पुरुषार्थमोक्षजनिका

कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा ॥ ननु स्वतंत्रा ध्रुव
कार्यकारिणी विद्या न किंचिन्मनसाऽप्यपेक्षते ॥ १२ ॥ विद्या यतः स्वतंत्रा विनाऽपि सहा
येन स्वकार्यसंपादने समर्था ॥ यथा तेजस्तिमिरनिवर्तनसमर्थं मनसाऽपि किंचित्सहायभूतं वस्तु
नापेक्षते ॥ तथा फले जननीये सहायांतरसंभावनाऽपि नेति भावः अनेन विद्या फलजनने निरपेक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वतंत्रत्वात्तेजोवदित्यत्रमानंसूचितम्॥१२॥समुच्चयवादीपरिहरति॥नेति त्वदुक्तंनेत्यर्थः॥स
त्यकार्यः॥अक्षय्यंह वैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिवेदेनबोधितःस्थिरकार्योऽपिअक्ष्व
रः यथाऽन्यानपिकारकादिकान्॥आरादुपकारकप्रयाजाद्यंगानिदेशकालादीनिचप्रकांक्षते

नसत्यकार्योऽपिहियद्वदध्वरःप्रकांक्षतेऽन्यानपिकारकादिकान्॥तथैवविद्यावि
धिनःप्रकाशितैर्विशिष्यतेकर्मभिरेवमुक्तये॥१३॥

तथाविद्यापिअग्निहोत्रंजुहोती
त्यादिविधिवाक्यतःतत्सहितेनप्रकाशितैःकर्मभिःसहितैवमुक्तयेविशिष्यतइत्यर्थः॥विद्या
फलदानेकर्मापेक्षा अंगित्वात्॥प्रयाजाद्यंगापेक्षदर्शादिवदितितिसत्प्रतिपक्षानुमानमनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रा॰गी ॥
॥ ८ ॥

तदनुपपत्तिं दर्शयति॥ केचिदिति॥ यत्केचिद्वितर्कवादिन इति ज्ञानकर्मणी समुच्चित्य मुक्ति
साधनं वदंति॥ तदप्यसत्॥ यथा केवलं कर्म मोक्षसाधनमित्यसत्तथा तन्मीलितमित्यप्यस
त्॥ तत्र हेतुर्दृष्टविरोधकारणात् दृष्टो यो विरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्य

केचिद्वदंतीति वितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात्॥ देहाभिमानादभि
वर्धते क्रियाविद्यागताहंकृतितः प्रसिद्ध्यति॥ १४॥

र्थः॥ विरोधमेवाह देहाभिमाना
क्रियावर्द्धते॥ अनात्मनि देहादावात्मत्वाभिमानात्क्रियावृद्धिः॥ विद्यानुगताहंकृतितः गताहंकृति ॥ राम ॥
र्यस्य तस्य नष्टाहंकृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवं चाहंकारसत्तामूलकत्वात्क्रियाज्ञान ॥ ८ ॥

यो: सत्तच्चयोर्विरुद्ध इत्यर्थः ॥ १४ ॥ अथ पूर्वपक्षमुक्त्वा तमानं दूषयन् विद्यास्वरूपमाह ॥ विशुद्धवि
ज्ञानं ये भ्यस्तेषां वेदान्तवाक्यानां यद्विशेषेणारोचनं रलयोरभेदादालोचनं विचारस्तेनांचिता
प्रापिता या चरमा आत्मवृत्तिर्ब्रह्माकारान्तःकरणवृत्तिः सा विद्येति भण्यते विशुद्धिरिति शेषः उ

विशुद्धविज्ञानविरोचनांचिता विद्यात्मवृत्तिश्चरमेति भण्यते ॥

तत्समुच्चयवारणाय विद्याकर्मणोर्वैषम्यमाह कर्मयज्ञादि अखिलकारकादिभिः कर्तव्यकर्मा
दिभिरंगैश्च सहितं समुदेति ॥ फलोन्मुखं भवति ॥ विद्या तु नरखिलकारकादिनि हंति ॥ नत्रकर्तृ
त्वादित्रिंनिहंति ॥ सकलव्यापारपरित्यागेन ब्रह्मणि समाप्तिर्हि विद्या ॥ अतः स्वोत्पन्नो चिनश्च

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्द्वाराकर्मसापेक्षास्वफलेजनयितव्येतन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभंगापत्तेरितिपूर्वप
भुक्तहेतोरसिद्धिरितिभावः॥१५॥उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह॥तस्मादिति॥विद्याविरोधा
द्विद्यायाःकर्मणासहविरोधेनसमुच्चयोनभवेत्तस्मान्मुधीर्मुमुक्षुरशेषतःकर्मत्यजेत्॥काम्यंतु(

उद्देतिकर्माखिलकारकादिभिर्निहंतिविद्याऽखिलकारकादिकम्॥१५॥तस्मात्त्य
जेत्कार्यमशेषतःसुधीर्विद्याविरोधान्नसमुच्चयोभवेत्॥

सर्वथात्याज्यमेवनित्यनैमि
त्तिकमपियावच्चित्तशुद्धिकर्त्तव्यमेव॥ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यंतंकर्त्तव्यमेव॥ततस्तद
नुसंधानंप्रतिबंधकत्वात्तद्योजनाभावाच्चतदपित्याज्यमेवेतिभाव॥इदानींमुमुक्षुकर्त्तव्यमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह निर्वृत्ताः सर्वेषामिंद्रियाणां गोचरा विषयाः शब्दादयो यस्मात्तादृशः स न्॥ आत्मनः सच्चिदान
न्दस्यानुसंधानमेव परमयनं प्राप्यं यस्य तथाविधो भवेत्॥ अथेंद्रियप्रत्याहारः कर्त्तव्यत्वेनोक्त
स्तेन तत्पूर्वं प्राणायामाद्यर्थादाक्षिप्तम्॥ १६ ॥ रागिविरागिभेदेन कर्मणां कर्त्तव्यतेत्याह॥ यावदि

आत्मानुसंधानपरायणाः सदा निवृत्तसर्वेंद्रियवृत्तिगोचरः॥ १६ ॥ यावच्छरी
रादिषु माययाऽत्मधीस्तावद्विधेयो विधिवादकर्मणाम्॥

ति॥ मायया विद्यया शरीरादिष्वनात्मसु आत्मधीरहंकर्त्तेत्यादिरूपा यावद्वर्त्तते तावद्विधिवादकर्मणां विधिर्यजेतेत्या
दिर्वादः कर्त्तव्यताबोधको येषां कर्मणां विधेयो वशवर्त्ती तत्कर्मकर्त्ता भवेत्॥ तदपगमे तु तद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खिलं जगन्नेतीतिवाक्यैः॥ अथात आदेशो नेति नेतीत्यादिवाक्यैर्निषिध्य मिथ्यात्वेन निर्णायितद्वि
लक्षणातया सत्यत्वेन परात्मस्वरूपं ज्ञात्वा क्रियास्त्यजेत् निरूपितमेतत्॥ ७ ॥ आत्मविज्ञा

नेतीतिवाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः॥ ७ ॥
यदा परात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरम्॥

नेस त्यवक्ष्येमविद्या निवर्ततइत्याह्॥ यदेति॥ आत्मनिशुद्धेऽन्तःकरणे परमात्मन ईशस्या
त्मनो जीवस्य च यो विभेदो मायान्तःकरणरूपोपाधिद्वयकृतो विभेदो भेदस्तस्य भेदकं नाश
कं भास्वरं प्रकाशशीलं यद्विज्ञानं इतरद्वन्द्वोपमर्दनपूर्वकं ब्रह्माकाराऽखण्डाहमिति यदावभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिअसंभावनादितिरस्कारेणोद्देति॥ नदेवसंस्कारकाजन्मांतरस्थापककर्मसहितामायातत्त्व(
ज्ञीवोपाधिभूताविद्यांऽञ्जसाकृटितिविलीयतेनश्यति॥ नऽनतन्नाशेऽपिसंसारनाथः कथम

तदेवमायाप्रविलीयतेंऽञ्जसासंस्कारकाकारणामात्मसंसृतेः॥ १८॥
श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी॥

त्तोमायाविशेषणाम्॥ आत्मसंसृतेकारणांसंसारस्योपादानकारणामेवंचतन्नाशेकार्यना
शोभवत्येवेतिभावः॥ १८॥ उक्तमेवार्थंपुनर्दर्श्यायाह॥ श्रुतीति॥ तत्त्वमसीत्यादिश्रुति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥रा·गी॥ द्वितीयेऽक्षमायोस्तन्निवृत्तज्ञानेन नाशिता सा विद्या कथमपि कार्यकारिणी भविष्यतीति काकु
॥११॥ रत्न॥ सर्वथानेत्यर्थः असतः कार्यकारित्वासंभवादिति भावः॥ ननु तन्नस्य नानोऽन्नवइत्याह॥

विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति॥१८॥

विज्ञानमात्रादिति अमलाद्द्वितीयतः शुद्धाद्द्वितीयात्मविषयकाद्विज्ञानमात्रादितरास
हरूनात्रिविधिध्यासनपरिपाकजज्ञानाद्यतो नष्टा तस्मात्सा पुनर्न भविष्यति रज्जुज्ञानस्मूल ॥राम॥
कस्य सर्पस्य रज्जुज्ञानेन निहतस्य यथा न पुनरुत्पत्तिरिति भावः॥ १८ ॥ ६२ ॥ ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विद्याया इतरनिरपेक्षाया एव मोक्षकारणत्वमुक्तं युक्तिपूर्वकं पुनः कथयति श्रोतृणामा
य॥ यदीति॥ यदि नष्टा तत्त्वज्ञाननाशिता न पुनः प्रसूयते नोत्पद्यते॥ तदा कारणाभावादहंम

यदि स्म नष्टा न पुनः प्रसूयते कर्ताहमस्येति मतिः कथं भवेत्॥ तस्मात्स्वतं
त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला॥ २० ॥

निः कथं भवेत्॥ कथ
मपि न भवेदित्यर्थः॥ तदभावाच्च तत्काले कर्माभावश्च तत्स्वफलजननेष्वा स्वतंत्रा इतरनिरपे
क्षैव न किमप्यपेक्षते॥ द्वितीयस्यासंभवात्॥ अतः केवलाऽसहायैव विमोक्षाय विभाति तत्फ
लिका भवतीत्यर्थः॥ २० ॥

॥ रा॰गी॥ अत्रार्थे श्रुतिरपि प्रमाणमित्याह सेति सा प्रसिद्धा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व
॥ १२॥ मानशुरित्यादिका तैत्तिरीयश्रुतिः प्रशस्तानामर्थवादैः प्राशस्त्येन बोधितानामपि कर्मणां त्या

सा तैत्तिरीयश्रुतिराह सादरं त्यासं प्रशस्ताखिलकर्मणां स्फुटम् ॥ एतावदि
त्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षाय न कर्मसाधनम् ॥ २१ ॥ ६७ ॥

संन्यासं सादरं स्फुटमाह ॥ न तु कर्मसमुच्चयमित्यर्थः ॥ तथा वाजिनां वाजसनेयिनाम् ॥ एताव ॥ राम ॥
द्रे खल्वमृतत्वमित्यादिका ज्ञानं विमोक्षाय साधनं न कर्मेत्येतदाह ॥ २१ ॥ ६२ ॥ ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहंकारत्यागरूपकारणावैषम्यात्क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलप्रयुक्तमपि वैषम्यमाह ॥ विद्येति
हे समुच्चयवादिन् त्वया कर्तुरग्निहोत्रादिर्विद्यासमत्वेन दर्शितः परं तु समो दृष्टान्तो नोदाहृतः अने
नकर्तुर्विद्यासमः ॥ श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानं निरस्तम् ॥ दृष्टान्ताभावात् ॥ अन्वयेनानु

विद्यासमत्वेन तु दर्शितस्त्वया कर्तुर्न दृष्टान्त उदाहृतः समः ॥ फलैः पृथक्त्वाद्बहुकारकैः
कर्तुः संसाध्यते ज्ञानमतो विपर्ययम् २२ ॥ मानं न व्यतिरेकीति भावः ॥ एतच्चाकरे विस्तरेण
प्रपंचितम् ॥ ननु विद्याकर्मणी समे ॥ एकफलत्वाच्चक्रदंडादिवदित्यनुमानमिति चेत्तत्राह ॥ फलैः पृथ
क्त्वात् पञ्चम्यर्थे तृतीया फलानां भेदादित्यर्थः एवं च स्वरूपासिद्धो हेतुरिति भावः समानकारकत्वमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥रा·गी॥ हेतुर्नेत्याह॥ ऋजुर्वक्रैभिः कारकैरहं ममताभिमानरूपैरांतरैर्बाह्यैश्च देशकालादिनियमैश्च साध्य
॥१३॥ ते॥ ज्ञानं तत्त्वतो विपर्ययवदतो नतयोः साम्यमिति भावः॥२२॥ नन्वकरणे प्रत्यवायभियाकर्मकार्य
मिति चेन्नेत्याह॥ सप्रत्यवाय इति कर्मत्यागे नहि निश्चयेनाहं प्रत्यवायसहितो भविष्यामीत्येवं

सप्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः॥ तस्माद्बुधैस्त्याज्यम
पि क्रियात्मभिर्विधानतः कर्मविधिप्रकाशितम्॥२३॥

शुद्धात्मनि अनात्मधर्मस्य धी
रज्ञस्य तत्त्वज्ञानविकलस्य प्रसिद्धा॥ न तु तत्त्वदर्शिनः॥ तस्याहंबुद्धेरभावात्॥ पापादेरनात्मधर्मतानि ॥राम॥
श्चयाच्च॥ तस्माद्बुधैः कर्मक्रियात्मभिः षष्ठ्यर्थे तृतीया॥ क्रियाफलसक्तचित्तानां विधानतो विधाने नेति ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्तव्यनयाउक्तंकर्मविधिभिरवश्यकर्त्तव्यतयाबोधितमपित्याज्यमित्यर्थः॥२३॥अथविरक्तस्य
कार्यमाह॥श्रद्धेति॥गुरुशास्त्रयोर्विश्वासःश्रद्धान्वितोउभुक्षुःशुद्धमानसोऽपिनिष्कामकर्मानु
ष्ठानाच्छुद्धमानसश्चगुरोःप्रसादात्तत्त्वमसीतिवाक्यतःआत्मजीवयोरैकात्म्यंविज्ञाय

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतोगुरोःप्रसादादपिशुद्धमानसः॥विज्ञायचैका
त्म्यमथात्मजीवयोःसुखीभवेन्मेरुरिवाप्रकंपनः॥२४॥

मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य चएवार्थः॥साक्षात्कृत्यैवसुखीभवेत्सकल
दुःखहीनोभवेदित्यर्थः॥अप्रकंपनःविषयाभिलाषाक्षोभितांतःकरणः॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महावाक्यं विवरीतुं वाक्यार्थस्य पदार्थबोधपूर्वकत्वमाह॥ आदाविति॥ विधानतः क्रमप्रमा
दराहित्येन वाक्यार्थविज्ञानस्य विधाउत्पत्तौ आदौ प्रथमं उरव्यमितित्यावत्पदार्थावगतिः

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः॥
तत्त्वं पदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत्॥२५॥

कारणात्॥ हि प्रसिद्धं तस्य पदत्रयं तत्त्वमसीति॥ तत्र तत्पदार्थः परमात्मा सर्वज्ञत्वादिगु
णः त्वंपदार्थो जीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यं तद्बोधकमसीतिपदम्॥ २५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननु सर्वज्ञत्वादिगुणस्येश्वरस्य किंचिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशंक्याह ॥ प्रत्यगिति
अहंवृत्तिवेद्यत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवा
त्मनोर्विरोधं विहाय त्यक्त्वानयोः संशोधितांशयुक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्यभावेऽ

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥

पि वक्ष्यमाणप्रकारया लक्षणया लक्षितां चिदात्मतां संगृह्य तत्त्वंपदोपस्थितिविषयीकृत्यात्म
मात्मानं तथा ज्ञात्वाऽथ स्वात्मज्ञानानंतरं अद्वयो भवेत् चित्स्वरूपतां प्राप्त इव भवेत् ॥ पू
र्वमपि तत्त्वरूप एव विस्मृतकंठचामीकरन्यायेन च तत्प्राप्तिरत इवेत्युक्तम् ॥ अयं भाव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वंपदयोर्द्वावर्थौवाच्योलक्ष्यश्चतत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः
त्वंपदस्यापिकिंचिज्ज्ञत्वादिविशिष्टोमायाकार्याविद्योपाधिरविद्यावदंतःकरणोपाधि
र्वावाच्यः॥उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यःतत्रवाच्ययोर्विरुद्धधर्मकत्वा

संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्॥ २६ ॥
एकात्मकत्वाज्जहतीनसंभवेत्तथाऽजहल्लक्षणतानाविरोधतः॥

द्वैक्यासंभवे
ऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति॥२३ ॥उक्तलक्षणास्वरूपमाह एकात्मकत्वादिति॥जह
तीलक्षणाजहत्स्वार्थलक्षणायथागंगायांघोषइत्यत्रगंगापदार्थस्यप्रवाहस्यघोषाधारत्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपपन्नासर्वथातत्परित्यागेनतीररूपार्थलक्षणा॥ साप्रकृतेनएकात्मकत्वात्॥ विशेष्यांशस्ये
कत्वान्सर्वथास्वार्थत्यागाभावात्॥ तथाऽजहल्लक्षणानाजहत्स्वार्थलक्षणावत्त्वमपिअत्रन
संभवतियथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा।

सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥ २७ ॥ ६९ ॥

सापिन॥ विरोधतः विशेषणात्यागेनसर्वथास्वार्थत्यागाभावात्॥ अतोभागलक्षणाजहदजहल्ल
क्षणायुज्येत॥ अदोषतः पूर्वोक्तदोषाभावात्॥ विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च॥ त
त्रदृष्टान्तः सोयंपदार्थाविवयथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोतीतानुभवविषयोवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्पदार्थः॥ एतद्देशादिविशिष्टोऽनुभूयमानो वेदंशब्दार्थः॥ तयोश्च विरुद्धविशेषणाकत्वादैक्यासं
भवेन देशादिरूपविशेषणात्यागेनानुभवगतातीतत्वादिविशेषणात्यागेन वा लक्षणयैक्यं त
द्वदितिभावः॥२७॥ अथ त्वाज्यत्वायजीवोपाधिमाह॥ रसादीनि॥ रसा पृथ्वी आदिर्येषां तानि पंचीकृ

रसादिपंचीकृतभूतसंभवं भोगालयं दुःखसुखादिकर्मणाम्॥ शरीरमाद्यंतवदा
दिकर्मजं मायामयं स्थूलमुपाधिमात्मनः॥२८॥

तानि यानि भूतानि तेभ्यः संभवो यस्य
तत्॥ पंचीकरणं चेत्थं एकैकं भूतं द्विधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तेषां भागानां स्वेतरभू
तचतुष्टयार्धभागचतुष्टये संयोजने एकैकं भूतं पंचात्मकं भवति॥ भागाधिक्याच्च प्रातिस्विकतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूरादिव्यवहारोऽपि ॥ सुखदुःखयोरादीनि यानि कर्माणि तेषां भोगस्तत्कर्मजसुखदुःखानुभवस्तस्मा
लयमाश्रयभूतमायतनवत् उत्पत्तिनाशयोगि ॥ आदिकर्मजं प्राग्भवीयकर्मजन्यं मायामयं परंपर
या मायाविकारः ॥ तद्विकारभूतविकारत्वात् ॥ एतच्छरीरमात्मनः स्थूलमुपाधिं वदंतीति शेषः ॥ २८

सूक्ष्मं मनोबुद्धिदशेंद्रियैर्युतं प्राणैरपंचीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाध
नं भवेच्छरीरमन्यद्विदुरात्मनो बुधाः ॥ २९ ॥

अथ सूक्ष्मोपाधिमाह ॥ सूक्ष्ममिति बुधा अन्यत
स्थूलशरीरविलक्षणं शरीरं लिंगदेहाख्यं आत्मन उपाधिं विदुः ॥ तत्स्वरूपमाह ॥ सूक्ष्मं चक्षुराद्यविष
यः मनोबुद्धिदशेंद्रियैः प्राणैश्च युतम् संकल्पात्मकं मनः निश्चयात्मिका बुद्धिः ॥ घ्राणरसनाचक्षु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रा॰गी॥
॥७॥

त्वक्श्रोत्रेति पंच ज्ञानेंद्रियाणि॥ वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि प्राणापानव्यानोदा
नसमानाश्च प्राणास्तैर्युतं एतत्सप्तदशसमुदायात्मकम्॥ तदाधारभूतान्याह पंचीकृतभूतसं
भवं तेभ्य उत्पन्नं अतएवादृश्यम् तथा भोक्तुः सुखदुःखादेः सुखदुःखाद्युद्भवस्यातु साधनम्

॥अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानं तु परं शरीरकम्॥

स्थूलशरीरस्येन्द्रियगणस्यैव भोगसाधनमिति भावः एतद्वियोगेनैव मरणव्यवहार इति बोध्य
म्॥२८॥ इति जीवोपाधिद्वयमुक्त्वा ईशोपाधिमाह॥ अनादीति॥ अनादि उत्पत्तिहीनम्॥ नानाविध
परिणामशालितया परिणामरूपेणानश्वरमिति अनादित्वमात्रोक्त्या सूचितम्॥ अनिर्वाच्यं सत्वा

॥राम॥
॥७॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्वाभ्यां निर्वक्तुमशक्यम्॥ कारणं सकलप्रपंचस्य जनकम्॥ ईदृशी माया जगत्सृष्टा। परं ईश्व
रव्यवहारसंपादकत्वादुत्कृष्टं प्रधानं शरीरकम्॥ स्वार्थकः॥ एवमुपाधिभेदादेकमेव चैतन्यं
यतः पृथक्स्थितं जीव ईश्वरश्चेति भेदमुक्त्वा विषयमनोलक्षणायोपाधिपरित्यागेन स्वात्मान
उपाधिभेदाद्यतः पृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात्॥३०॥ कोशेष्व
यं तेषु तु तत्तद्रूपतां निर्विभाति संगात्स्फटिकोपलो यथा॥
मात्मनि अवधारयेदभेदेन
जानीयात्॥ क्रमात् श्रवणमनननिदिध्यासनक्रमेणेत्यर्थः॥३०॥ अथ वाक्यार्थविचारफलमा
ह॥ कोशेष्विति॥ आनन्दमयस्य ब्रह्मत्वे अन्नमयप्राणमयमनोमयविज्ञानमयेषु चतुर्षु को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषतन्तत्त्वसंगात्तत्तदाकृतिर्विभातियथाजपादिसंगात्स्फटिकोऽनेकाकृतिर्भाति॥आनन्दमयस्या
पिजीवत्वत्ववादिनांतुतेनसहपंचसुकोशेष्ठितिर्वोध्यं॥अस्मिन्महावाक्येपरितोविचारितेसम्य
ग्विचारितेसत्ययमात्मासंगरूपः अन्नमयादिभिःसंगरहितः॥असंगानहिसज्जतइतिश्रु

असंगरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते॥ ३१ ॥

तेः अजोऽद्वयश्चविज्ञायते॥स्थूलोहमित्यादिस्तत्वज्ञस्यतत्तत्कोशप्रसंगात्प्रतीतिःस्फटिक
वत्॥तत्वज्ञस्यतुनतथाप्रतीरितिभावः एवंचतत्तदुपाधिकृततद्रूपताप्रतीतिनिरास ॥राम॥
एवविचारफलमितिभावः॥ ३१ ॥श्रीरामचन्द्रायनमः॥ ३१ ॥ ६८ ॥ ॥१८॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जाग्रदाद्यवस्थाऽपि बुद्धिधर्मो नात्मधर्म इत्याह। बुद्धेरिति॥ इह आत्मनि स्वप्नादिभेदेन जाग्रत्स्व
प्नसुषुप्तिभेदेन यास्त्रिधा बुद्धिर्दृश्यते साऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरू
पाया बुद्धेर्धर्मः उक्तावस्थात्रयस्याकस्मिकत्वात्॥ एतदवस्थात्रयस्यास्मिन् अवस्थानं व्यभिचा

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः॥ ७ ॥

रतो मृषा तुच्छाध्यासनिबंधनं न तु वास्तवमित्यर्थः॥ अन्योऽन्यतो व्यभिचारतस्तस्या अवस्थात्रय
स्य स्वरूपतो मृषात्वात् तज्ज्ञानस्य मृषात्वमेव॥ स्वप्नकाले जाग्रत्सुषुप्त्योरभावात्॥ जाग्रति इतर
द्वयस्याभावात्॥ सुषुप्तावितरयोरभावात्॥ परस्परं व्यभिचारो बोध्यः॥ आत्मनस्तदनाश्रयत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषणैराह॥ नित्येऽव्यक्ते नाशशून्ये परे गुणात्रयातीते ब्रह्मणि व्यापके केवलेऽसंगे शिवे।
आनन्दरूपे स्वं भूते स्वदेकरसे परस्परव्यभिचारधर्माधानमसंभवीति भावः॥ ३१ ॥ अथ त्वाज्ञ
त्वाय संसारमूलभूतां तृष्णामाह। देहेति। रूपां संघातमिदं तरे तराध्यासविषयात्। अज्ञस्वं याव

अन्योऽन्यतोऽस्मिन्व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे॥ ३२ ॥ देहेन्द्रि
यप्राणमनश्चिदात्मनां संघातजस्त्रं परिवर्तते धियः। तृष्णा तमोमूलतयाज्ञल
क्षणा यावद्भवेत्तावदसौ भवोद्भवः॥ ३३ ॥

धियोऽदेहेन्द्रिति तमोमूलतयाज्ञलक्षणा
अज्ञत्वज्ञापिका यावत्परिवर्तते॥ तावद्भवोद्भवः संसारोद्भवो भवेदनन्तमः पदं रजसोपलक्ष
णम्॥ रजस्तमः प्रधाना वृत्तिः संसारहेतुत्वात्सर्वथा त्याज्येति भावः॥ ३३ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतमहावाक्यविचारस्यकर्त्तव्यमाह॥नेतीति॥अथातआदेशोनेतिनेतीतिप्रमाणेननिराकृ
तंमिथ्यात्वेनगृहीतमखिलंजगत्येनसः॥ततोहृदासत्त्वप्रधानेनमनसासम्यगास्वादितं
चिद्घक्षरांघनानन्दंदुःखासंभिन्नंसुखंयेनसः॥स्वर्गादिजपरिणामदुःखत्वात्तत्संभिन्नमेव

॥नेतिप्रमाणेननिराकृताखिलोहृदासमास्वादितचिद्घनानन्दः॥

एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत्॥हानोपादानबुद्धिविषयंनकुर्यात्॥किंतु
साक्षीनस्तत्रभवेत्॥ननुदेहेन्द्रियादिभिरेवतज्ज्ञानलाभात्कथंतदुपजीव्यस्यत्यागइत्याशंक्यदृ
ष्टान्तदर्शनेनपरिहरति॥यथातृषावानाम्रान्तःसङ्गोमाधुर्येणतादृशंनारिकेलनारंगादिफ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रा.गी॥
॥२०॥

लां न वर्त्स्यं भः प्रीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति न द्वत्सर्व हस्पसारांशो त्रुत्स तद्या
भे सतिनिः सारं हस्पं नो पादेयं नापि हेयमिति भावः॥ यतो भयादिसंभावनानडेयमित्युच्यते॥ ३४॥
इ तरस्या नित्यत्वेन तत्त्ववैराग्यार्थमात्मनस्त्ववनित्यमाह॥ कदाचिदिति॥ कदापीत्यर्थः॥ अनवःऽन्य

त्यजेद्दशोषं जगदात्मसङ्गं प्रीत्वा यथांऽभः प्रजहाति तत्फलम्॥ ३४॥ कदाचिदा
त्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः॥

त्यनंतरं विद्यमानो हि नवः ते
न जन्मानंतरास्तित्वं व्यावर्तितं॥ नवत्वाभावे नैव जीर्णत्वाभावादवस्थांतरापत्तिरूपपरिणा
मोऽपि निरस्तः॥ अने न जायतेऽस्ति विपरिणमते वर्धते पक्षीयते नश्यतीति षड्भावविकाररहि

॥राम॥
॥२०॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यगुक्तं॥ एवं चैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्वादनित्यमिति ततोविरज्येतेति बोधितं॥ य
तईदृशो तएव निरस्तः सर्वस्य देहेंद्रियादेरतिशयो महत्वं येन स्वलाभात्तः॥ यल्लाभान्नापरोला
भ इति श्रुतेः॥ यतः सुखात्मकः आनन्दस्वरूपः स्वयंप्रभः स्वप्रकाशः देहेन्द्रियादिस्तुसुः ख

॥निरस्तसर्वातिशयः सुखात्मकः स्वयंप्रभः सर्वगतोऽयमद्वयः॥३५॥

स्वरूपः परप्रकाश्यश्च॥ यस्य भासा सर्वमिदं विभातीति श्रुतेः॥ सर्वगतो व्यापकः अयमहंबुद्धि
विषयः प्रत्यगात्माऽपि अद्वयः॥ उक्ताद्वयब्रह्मस्वरूप एव॥ नततोऽतिरिक्त इति भावः अयमात्माब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वेवंविधेविकारशून्यआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशंकते॥एवंवि
धेइति॥दुःखमयदुःखप्रचुरःउत्तरयति अज्ञानमूलकोयोऽध्यासोदेहांतःकरणादौअहंममेत्यध्या

एवंविधेज्ञानमयेसुखात्मकेकथंभवोदुःखमयःप्रतीयते॥अज्ञानतोऽध्यासव
शात्प्रकाशतेज्ञानेविलीयेतविरोधतःक्षणात्॥३६॥

सत्त्वदृशात्॥एवंचभ्रांतिरू
पातत्वमनीतिरितिभावः॥नन्वेवंकथंतस्यसंसारस्यनिवृत्तिस्तत्राह॥ज्ञानेति॥आविर्भूतइतिशे
षः॥ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणादेवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि
विलयइत्यर्थः॥यथारज्जुसर्पस्यलयइत्यर्थः॥३६॥ ॥श्रीकृष्णायनमः॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाध्यासलक्षणमाह। यदन्यदिति यदन्यत्सर्पादिकमन्यत्र रज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्वि
भाव्यते विज्ञायते॥ अमुं विपश्चितो विद्वांसोऽध्यास इत्याहुः॥ यथाऽसर्पभूते रज्ज्वादौ अहिर्विभा

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥ असर्पभू
तेहि विभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥ ३८ ॥ ६९ ॥

वनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्यते आत्म
ज्ञानाभावाद्यथार्थतया ज्ञायते॥ ३८ ॥ ॥श्रीकृष्णाय नमः॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रा·गी॥
॥२२॥

आत्मनि जगज्ञानेकीदृशोऽध्यासो निमित्तं तदाह॥ विकल्पेति॥ सर्वविकल्पकारणमायारहि
ते वस्तुतत्त्वसंगरहिते चिदात्मके चित्स्वरूपे सर्वकारणे निरामयेऽ: स्वासंभिन्नानंदमयकेव

विकल्पमायारहिते चिदात्मकेऽहंकार एषः प्रथमः प्रकल्पितः॥ अध्यास
एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे॥ ३८॥

ले सर्वविकारशून्ये परे दृश्यविलक्षणे ब्रह्मणि व्यापके आत्मनि प्रथमहंकारः कल्पितः स
एवाध्यासः॥ अहं ब्रह्मात्मकोऽध्यास एव सर्वसंसारकारणमिति भावः॥ ३८॥ छ

॥राम॥
॥२२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्भिन्निष्ठ एव संसारो न त्वात्मनिष्ठ इत्यत्रान्वयव्यतिरेकौ प्रमाणयति॥ इच्छादीति॥ परे सर्वसाक्षिणि
आत्मनि संसृतिहेतवः भासमानसंसारकारणं सदा कालत्रयेऽपि इच्छादिरागादिसुखादिधर्मिका
इच्छोपेक्षे रागद्वेषौ सुखदुःखे इत्येवमादिद्वंद्वधर्मिकाः धिय एव॥ धीभ्रमनीभ्र संसार इत्यन्वय

इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे॥ यस्मात्प्रसु-
प्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः॥ ३९॥ सुप्तौ तु व्यतिरेकमा-
ह यस्मात्कारणात्प्रसुप्तौ तदभावात् धीवृत्त्यभावात्॥ पर आत्मा नोऽस्माभिः तृतीयार्थे षष्ठीः॥ सु-
खरूपेण स्वस्वरूपमात्रेण विभाव्यते निश्चीयते॥ न तु संसारित्वेनेति भावः सुप्तोत्थितस्य सुखम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रा॰गी॰ ॥ हमस्माकमितिप्रत्यभिज्ञातभवान्तदात्मस्वरूपनिश्चयोऽस्मीतितात्पर्यम् ॥ ३९ ॥ तत्र तत्त्वंपदार्थस्व
॥ २३ ॥ रूपमाह अनादीतिअनादिर्याविद्यातनतउद्भवोयस्मात्तद्बुद्धेरंतःकरणास्यतत्रविंवितश्चितःप्रकाशः
सजीवइतीर्यतेआत्मापरमात्माधियःसाक्षितयाधीधर्मासंगेनैवपृथक्स्थितः ॥ अंतर्यामित

अनाद्यविद्योद्भवबुद्धिविंवितोजीवःप्रकाशोऽयमितीर्यतेचितः ॥ आत्माधियः
साक्षितयापृथक्स्थितोबुद्ध्यापरिच्छिन्नपरःसएवहि ॥ ४० ॥

येत्यर्थः ॥ जीवोऽहंक
र्त्रीत्यादिप्रकारेणांतःकरणधर्माध्यासवान्परमात्मातुसाक्षितयासर्वज्ञविद्यमानोऽपितत ॥ राम ॥
येतिभावः ॥ अतएवबुद्ध्यापरिच्छिन्नपरःबुद्धिलक्षणापरिच्छेदरहितःअतएव ॥ एवंचज्ञानेन ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिविंबाधारविलयेप्रतिविंबस्यविलयात्तजीवः सएवपरमात्मेवहिप्रसिद्धंसइत्यस्यचा
व्रत्तिर्वोध्या॥४०॥अथजीवात्मनोः परस्पराध्यासवशात्परस्परधर्मभानमितिदार्ढ्यायपुनरा
ह॥चिद्बिंबेति॥चिदात्मचेतनसोरन्योन्याध्यासवशात्परस्परतादात्म्यारोपाज्ज्ञत्वजडत्वंप्रतीयते

चिद्बिंबसाक्षात्मधियांप्रसंगतस्त्वेकत्रवासादनलाक्तलोहवत्॥

चेतनसोर्वृत्तीनांज्ञानत्वंजीवात्मनोजडत्वंप्रतीयते॥अतएवज्ञानाश्रयआत्मेतिचितएवता
र्किकव्यवहारजीवात्मनिजडात्माकथ्यतेवुधैरितिस्मार्तव्यवहारश्च अत्रहेतुःचिदित्यादि॥चि
द्बिंबंयस्यसचिदाभासः अक्षैः सहितः साक्षः सेन्द्रियः सचासावात्मामनः धीरंतःकरणं तेषां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृष्टसंगादतिसन्निकर्षाद्ध्यास इत्यर्थः। अत्र दृष्टांतः अनलाक्तलोहवत्॥ अग्निधर्मो दाहकत्वं लोहधर्मश्च वर्तुलत्वाद्यनले भासते॥ तत्र हेतुरेकत्रवासान्तरस्पराविभागेन हृन्नोरित्यर्थः। न ह्येतयोरपि परस्परधर्माध्यास इत्यर्थः॥ ४१ ॥ उक्तमेवार्थदार्ष्टांयएनराह॥ गुरोरिति वेदवाक्यत इत्य

अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वं चचिदात्मचेतसोः॥ ४१ ॥ गुरोः सकाशादपि वेदवाक्यतः संजातविद्यानुभवो निरीक्ष्य तम्॥

नेन श्रवणंगुरोः सकाशादपि॥ ततश्चानेन मननमुक्तं॥ ताभ्यां संजातो विद्ययाज्ञानरूपस्यात्मनोऽनुभवो यस्य सः॥ अनेन कृतनिदिध्यासन इत्यर्थः॥ तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं हृत्स्थं निरीक्ष्य अपरोक्षीकृत्याशेषं जडं दृश्यं त्यजेत्॥ न त्वोदासीनो भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽदितिभावः ॥ ४२ ॥ ज्ञेयंनिरुपाधिकंस्वरूपंश्लोकद्वयेनाह ॥ प्रकाशेति ॥ अहंप्रकाशरूपःस्वप्रका
शःपरप्रकाशहीनःपरप्रकाशरूपोयथाघटादिः ॥ अजोजन्मादिहीनःअद्वयःसजातीयद्विती
यरहितःअसकृद्विभातःसकृदपिपरेणाभासकांतरेणाप्रकाशितःसकृद्विभातःनसकृद्विभा

स्वात्मानमात्मस्थमुपाधिवर्जितंत्यजेदशेषंजडमात्मगोचरम् ॥ ४२ ॥ प्रकाशरू
पोऽहमजोऽहमद्वयोसकृद्विभातोऽहमतीवनिर्मलः ॥ विशुद्धविज्ञानघनोनिरा
मयःसंपूर्णआनन्दमयोऽहमक्रियः ॥ ४३ ॥ नोसकृद्विभातःनतत्रसूर्योभातिनचंद्र

तारकमितिश्रुतेःनतन्नासयतेसूर्यइतिस्मृतेश्च ॥ अतीवनिर्मलःमायाकृतावरणविक्षेपरहि
तःविशुद्धविज्ञानघनःविशुद्धचिदेकरसःनिरामयःकर्तृत्वाभिमानरहितःसंपूर्णःदेशकाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थमयत्व् अक्रियः परिणामहीनः॥ ७३ ॥सदैवेति अहंसदैवकालत्रयेऽपिउक्तः सर्वधर्मरहितः अचिंत्यशक्तिमान्य॥परमात्मा॥अतींद्रियज्ञानं इन्द्रियातिरिक्तज्ञानरूपः यतोवाचोनिवर्त्तन्तेअप्राप्यमनसासहइतिश्रुतेः॥अविक्रियात्म

सदैवउक्तोऽहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः॥अनंतपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः॥४४॥

कोऽपरिणामीअनंतपारःअनंतकालतःपारःपरंतीरंनावविद्यमानोयस्य॥नेनदेशकालपरिच्छेदहीनःईदृशोयःपरमात्माबुधैर्हृदिअहर्निशंविभावितःसोऽहमित्यर्थः॥४४ ॥श्रीकृष्णायनमः॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंभावनायाः फलमाह॥ एवमिति उक्तरीत्यासदाआत्मानंअखंडितात्मनाविषयानाकृष्ट
चित्तेनविचाररागस्य ध्यायतः॥ धातूनामनेकार्थत्वात् चरमारागएवचारमारागः स्वार्थेऽरा॥ वि

एवंसदात्मानमखंडितात्मनाविचारमारागस्य विशुद्धभावना॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वडुपासितंरुजः॥ ४५ ॥

शुद्धभावनाब्रह्माकारांतःकरणवृत्तिरुदेतीतिशेषः साचोदिताकारकैर्देहांतरप्रापककर्मभिः सहाविद्यामचिरेणशीघ्रमेवहन्यात्॥ यथोपासितंसेवितंरसायनंरुजोहन्यात्तद्वत्
॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र ध्याने इति कर्तव्यतामाह॥ विविक्त इति॥ निर्जन इत्यर्थः॥ आसीनो यथोचितपद्मासनाद्युप
विष्टः उपारतेंद्रियः तेन शमदमादिसंपन्नः विनिर्जितात्मा प्राणायामादिभिर्जितांतःकरणः
अतएव विमलांतराशयो विशुद्धचित्त॥ विज्ञानदृक विज्ञानेएव दृक भावनं यस्य सः॥ द्रष्ट

विविक्त आसीन उपारतेंद्रियो विनिर्जितात्मा विमलांतराशयः॥ विभावयेदे
कमनन्यसाधनो विज्ञानदृक्केवलआत्मसंस्थितः॥ ४६ ॥

दृश्यभानरहित॥ अनेननि
र्विकल्पकसमाधिरुक्तः॥ अनन्यसाधनः तत्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः के ॥राम॥
वलो ऽसंगः आत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः संजातायस्य सः तेन न कदापि विषयांतरसं ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चारवस्थितः विभावयेत्ध्यायेत् ॥ ५६ ॥ किंच यदेतत्भूतंभविष्यद्वर्त्तमानंविश्वंपरमात्मादर्शनं
भासकोयस्यतत् ॥ तस्यभासासर्वमिदंविभातीतिश्रुतेः ॥ तत्सर्वकारणोमायासन्निधानात्सर्वो

विश्वंयदेतत्परमात्मदर्शनंविलापयेदात्मनिसर्वकारणे ॥ पूर्णश्चिदानन्द
मयोवतिष्ठतेनवेदवाह्यंनचकिंचिदांतरम् ॥ ५७ ॥

पादानत्वेनाभिमतेआत्मनिवि
लापयेत् ॥ उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् ॥ तादृशस्यलक्षणमाह ॥ संपूर्णः अ
वाप्तसमस्तकामः तस्यकाम्याभावात्चिदानंदमयः तद्रूपोवतिष्ठते ॥ वाह्यमांतरंचदृश्यंनजा
नातिसर्वत्रब्रह्मदर्शनादितिभावः ॥ ५७ ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाधिसिद्धेः पूर्वं यत्कर्त्तव्यं तदाह॥ पूर्वमिति समाधेः सकलविषयव्यासंगनिवृत्तिपूर्वकं ब्रह्मा
कारवृत्तिः समाधिस्ततः पूर्वं अखिलं सचराचरं जगत् ओंकारमात्रं विचिंतयेत्॥ ओंकारो मीयते

पूर्वं समाधेरखिलं विचिंतयेदोंकारमात्रं सचराचरं जगत्॥ तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः॥४८॥

नयेति मात्रा प्रमाणं बोधकत्वेन परिच्छेदको यस्य तथा जानीयात्॥ तदेव विवृणोति॥ तदेवेति॥ जगदेवेत्यर्थः प्रणवो वाचको विभाव्यते स्पष्टं न हि प्रसिद्ध इत्यर्थः॥ इयं भावना ज्ञानवशादेव न बोधतः निर्विशेषब्रह्मसाक्षात्कार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तउत्तरं नेत्यर्थः तस्य सर्वद्वन्द्वप्रमर्दकत्वात् ॥ ४८ ॥ उक्तमर्थं विवृणोति ॥ अकारेति ॥ अकारसंज्ञस्त
द्वाच्यः पुरुषो हि विश्वको विश्वस्य वा विश्वकः ॥ विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट्
ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः ॥ लिंगदेहाभिमानी हिरण्यगर्भ उकारः उकारप्र

अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् ॥ प्राज्ञो मकारः
परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

तिपाद्य ईर्यते ॥ ततः सुषुप्ति
साक्षी प्राज्ञपदवाच्यो मायोपाधिको मकारस्तद्वाच्यः पठ्यतेऽखिलैर्वेदैः ॥ इयं भावना समाधि
पूर्वं समाधेः पूर्वमेव ततत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् ॥ सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा·गी
२८

अथविलापनप्रकारमाहद्वाभ्याम्॥ विश्वंत्विति॥ उकारमध्येवऽधाव्यवस्थितंस्थूलदेहाभिवं
धनंस्थूलदेहाभिमानेनस्थितंविश्वंप्ररूपंतद्वाचकमकारंचविलापयेत्॥ तच्छार्थे॥ विली

विश्वंत्वकारंप्ररूपंविलापयेउकारमध्येवऊधाव्यवस्थितम्॥ ततोमका
रेप्रविलाप्यतैजसंद्वितीयवर्णांप्रणावस्यचांतिमे॥ ५०॥

नंभावयेत्॥ ततस्तैजसं
लिंगदेहाभिमानिनंप्ररूपंतद्वाचकंप्रणावद्वितीयवर्णाउकारंविलीनविश्वकंमकारेवि
लाप्यविलीनंभावयित्वा॥ ५० ॥ श्रीरामकृष्णायनमः॥ छ ॥

राम
२८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तादृशं मकारं तद्वाच्यं प्राज्ञं च कारणं कारणात्माभिमानिनं एतद्रूपं इहात्मनि चिद्घने परे विलाप
येत्॥ तथा भावयेत्॥ ततः सोऽहं सर्वविलयाधिष्ठानं परं ब्रह्म विभावयेत्॥ तद्विशिनष्टि॥ सदावि
मुक्तिमत् नित्यमुक्तम्॥ नत्वहंपदार्थस्य रागद्वेषादिमलिनस्य कथं ब्रह्मत्वभावनेत्याह। पदार्थविशि

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम्॥ सोऽहं परं ब्रह्म
सदाविमुक्तिमद्विज्ञानदृङ्मुक्तउपाधितोऽमलः॥ ५१ ॥

निष्टि उपाधितो मुक्तः अतः ए
वामलः तथाभावने साधनम्॥ विज्ञानदृग्विज्ञानं निदिध्यासनं ब्रह्ममात्रप्रत्ययाविच्छेदरूपा
दृक् तत्साक्षात्कारे साधनं यस्य सः॥५१ ॥ ६२ ॥ ५१ ॥ ६ ॥ श्रीराम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रा॰गी॥ एवंभावनावतोलक्षणमाह॥ एवमिति॥ उक्तप्रकारेणसदाज्ञानापरमात्मन्येकभावनायस्यसः

॥२९॥ परिविस्मृतमखिलंभवदेहादियेनसः॥ अतएवस्वरूपानंदेनैवतुष्टः नतुविषयानन्देन

तस्यपरिणामेदुःखरूपत्वात्तेनोविरक्तइत्यर्थः॥ साक्षान्नित्यात्मनिजसुखप्रकाशकः साक्षादेपाधि

एवंसदाज्ञानपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः॥ आस्तेस

नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिंधुवत्॥५२॥ कनामरूप

भेदराहित्येननित्यमखंडितमात्मस्वरूपंयत्सुखप्रकाशश्चतद्रूपः॥ एवंरूपोविमुक्तोजीव ॥राम॥ ॥२९॥

न्मुक्तः॥ अचलंनिश्चलंवारियस्यतादृशोसिंधुवदास्ते॥ विषयसंबंधरूपलहरीरहितआस्तइत्यर्थः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईदृशस्य मन्त्राग्निर्भवत्येवेत्याह ॥ एवमिति ॥ उक्तप्रकारेण सदाभ्यस्तसमाधेर्योगिनः ॥ निवृत्ताः
सर्वेषामिन्द्रियाणां गोचरा विषयाः शब्दादयो यस्य विनिर्जिता अशेषारिपवः कामादयो येन
तस्य तज्जयेन विषयेष्वन्तःकरणप्रवृत्तिः सूचिता ॥ अत एव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्व

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जि
ताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥ ५३ ॥

बोधरूपत्वस्वतन्
त्रत्वनित्यमलुप्तत्वानन्तरूपाः षड्गुणा यस्य तादृश आत्मा जितो वशीकृतो येन तस्य सदा दृ
श्यो भवेयम् ॥ एतेन मन्त्रज्ञस्य योगिनोऽहं दृश्यो न तु भक्तिविकलस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंविधोजीवन्मुक्तः प्रारब्धवशेनअनभिमानः भोगानश्नंस्तिष्ठेत् ॥ ततोमय्येवविलीयतेमद्रूपोभवतीत्याह ध्यात्वैवमिति ॥ ५४ ॥सर्वधर्मान्येसयायमेवधर्मोज्यायानित्याह ॥आदौचेति

ध्यात्वैवमात्मानमहर्निशंजनिस्तिष्ठेत्सदाजक्तसमस्तवंधनः ॥ प्रारब्धमश्नन्नभिमानवर्जितोमय्येवसाक्षात्प्रविलीयतेततः ॥ ५४ ॥आदौचमध्येचतथैवचांततोभवंविदित्वाभयशोककारणम् ॥ भवसंसारंआदिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादेर्यजेनेत्यादिभिश्चोदितंवोधितंसमस्तंकर्ममार्गंकाम्यंहित्वाअखिलात्मनाजीवानांस्वरूपभूतंमामात्मानंपरमेश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रं भजेत् ॥ यथा धनस्यार्जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतभयमंते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५५ ॥ मध्यभेदनभावनयानामरूपाविभागेन मद्रूपस्त्वं भवतीत्यत्र मर्थं सदृष्टांतमाह ॥ आत्मनीति ॥ आत्मनि सर्वाधिष्ठाने मयि इदं स्वस्व

हित्वा समस्तं विधिवादचोदितं भजेत्त्वमात्मानमथाखिलात्मनाम् ॥ ५५ ॥ आ
त्मन्स भेदेन विभावयन्निदं भवत्सभेदेन मयाऽत्मना नदा ॥

रूपं जीवमभेदेन विभावयन्सदा तिष्ठतीति शेषः ॥ तदा मयात्मना परमेश्वरेणाभेदेन भवति अभिन्नो भवति तत्र दृष्टांतः ॥ यथा समुद्रे प्रविष्टं नद्यादिजलं समुद्र एव ॥ यथा क्षीरे गवादिक्षीरे प्रक्षिप्तं पयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥रा॰गी॥ क्षीरमेव॥ यथाव्योम्नि महाकाशे घटाद्येवच्छिन्नाकाशो घटादिभंगे॥ यथा चर्मभस्त्रिकाद्यव॰
॥ २१ ॥ च्छिन्नो वायुरनिले महावायौ नामरूपाविभागेनैकीभवतीत्यर्थः॥ ५६ ॥ एवमात्मनस्त्वज्ञ
स्य जगत्सत्यत्वभ्रमः स्वतएवापैतीत्याह इत्थमिति॥ हिरण्यथें॥ लोकसंस्थितोऽपि जीवन्मुक्ति

यथा जलं वारिनिधौ यथा पयः क्षीरे वियद्व्योम्न्यनिले यथाऽनिलः॥ ५६ ॥
इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः॥

दशायां प्रारब्धवशाल्लोकव्यवहारं कुर्वन्नपि जगन्मृषैवेति विभावयन्सन् यदि यदा इत्थमी ॥राप॥
क्षते ऐकात्म्यं जानीयात्तदा निहतजगत्सत्यत्वभ्रमो भवतीति शेषः॥ तत्र हेतुः॥ श्रुतिगुम्फिमा ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो निराकृतत्वात् ॥ अतोऽन्यदार्त्तमित्यादिश्रुतिरूपात् जगन्मिथ्या दृश्यत्वात् ॥ शुक्तिरजतव-
दिति तदुपबृंहितानुमानरूपात् मानतः प्रमाणतो निराकृतत्वात् ॥ तत्र दृष्टान्तो यथेंदुभेदः

॥ निराकृतत्वात्कृतिशुक्तिमानतो यथेंदुभेदो दिशि दिग्भ्रमादयः ॥ ७ ॥

एकचंद्रे द्विचन्द्रत्वभ्रमस्तदेकत्वज्ञाने न निवर्त्तते यथा च दिशि प्राच्यादौ अन्यदिक्त्वभ्रमः ॥ सोऽपि
तत्वज्ञानान्निवर्त्तते एवं भ्रमतः पुरुषस्य दिक्षु भ्रमणभ्रमो निकटवर्त्तिवृक्षादौ च भ्रमणभ्रमस्तत्स्थैर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानेन निवर्तते न तत् ॥ ७ ॥ ईदृशज्ञाने मदाराधनमेवोपाय इत्याह ॥ यावदिति ॥ अखिलं जग
न्मदात्मकं मदधिष्ठानकं मद्विवर्तभूतं यावन्न पश्येत्तावन्मत्प्राप्तये श्रद्धालुः भगवदाराधन
मेव ज्ञानप्रापकमित्यचलदृढविश्वासवान् ॥ अतिशयेनोर्जिता उद्भिन्ना भक्तिर्मयि भगवति ऊ

यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥ श्रद्धालुरत्यूर्जि
तभक्तिलक्षणो यस्तस्य दृश्योऽहमहर्निशं हृदि ॥ ५८ ॥ ॥ ८ ॥

र्जिता उद्भिन्नरूपा लक्षणं चिह्नं यस्य सः ॥ तावन्मदाराधननिष्ठो भवेत् एवं हि तस्य हृदि अहम
हर्निशं दृश्यो भवामि ॥ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति स्मृतेः ॥ ५८ ॥ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सोक्तवचनजातस्यश्रुतिसमत्वंकथमेतदालोचनमपिमदाराधनप्रतिबंधकदुरितध्वंसोपायह
त्वाह ॥ रहस्यमिति ॥ श्रुतिसारसंग्रहत्वेनातिगोपनीयताअप्रमाणाशंकाकलंकराहित्यस्तुचिन

रहस्यमेतच्छ्रुतिसारसंग्रहंमयाविनिश्चित्यनवोदितंप्रिय ॥ यस्त्वेतदालोचय
तीहबुद्धिमान्समुच्यतेपातकराशिभिःक्षणात् ॥ ५८ ॥ प्रातर्यदीदंपरिदृश्यतेज
गन्मायैवसर्वंपरिहृत्यचेतसा ॥ म् ॥ आलोचयतिसम्यग्विचारयति ॥ ५८ ॥ अथभ
गवानुक्तमेवार्थसंक्षेपेणादार्ढ्यायपुनराह ॥ प्रातरिति यदीतियदीत्यर्थे ॥ यदिदंजगत्
परिदृश्यतेतत्सर्वंमायैवेतिज्ञात्वेतिशेषः ॥ चेतसासर्वंपरिहृत्यतच्चाहंदासीन्यंकृत्वामज्ञा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रा॰ गी ॥ वनयामदेकभावनयाभावितं शुद्धं मानसं यस्य तादृशास्तिष्ठन्नुपदिश्याशिषं प्राह ॥ निराम
॥ ३३ ॥ यः सन् सुखीभव सर्वदुःखनिवृत्तिभाव ॥ ततोऽन्तरंगामध्यामाशिषमाह ॥ आनन्दमयो भ

मद्भावनाभावितशुद्धमानसः सुखीभवानंदमयो निरामयः ॥ ६० ॥ यः से
वते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥

वा ॥ तद्रूपो भवेत्यर्थः

यद्यपि पूर्वमानंदरूपत्वमस्त्येव तथाऽपि तत्राभिर्विस्मृतकंठस्थभूषणप्राप्तिवत् ॥ ६० ॥ ॥ राम ॥
सर्वरीत्यात्मोपासकस्य लोकपावनत्वमाह ॥ यइति ॥ कदा वा यदा कदाचिदित्यर्थः ॥ हृदा निर्म ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेनांतःकरणेनयोमामगुणांज्ञाकृतसत्वरजस्तमोरूपगुणारहितम्॥सच्चिदानन्दरूपत्वात्॥अत
एवगुणात्परंगुणादव्याकृतात्परंमायातीतम्॥यदिवायद्देत्यर्थे॥गुणात्मकंसर्वज्ञत्वादिलोको
त्तरलावण्यादिगुणावानात्मामूर्तिर्यस्यतंहृदयमानंरूपंसेवते॥सद्विविधोऽप्युपासकः अहंमन्ये

सोहंस्वपादांघ्रिनरेणुभिःस्पृशन्पुनातिलोकत्रितयंयथारविः॥ ६१ ॥

रूपएव॥मामकइत्यर्थोवा॥प्रियोहिज्ञानिनोऽत्यर्थमहंसचममप्रियइत्युक्तेः॥तादृशोभक्तः
स्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपिपुनाति अज्ञानध्वांतनिरसनेनपवित्रीकरोति॥यथा
रविःस्वकरैर्जगद्वितिमिरीकरोतितद्वत्॥ ६१ ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदानीमेनं तु थार्थालोचनासमर्थस्य पाठमात्रतोऽपि महत्फलमाह॥ विज्ञानं विज्ञानजनकं करणमस्येतिबोध्यम्॥ वेदांतैरुपनिषद्वाक्यैर्वेद्यं चरणं जगज्जन्मादिलक्षणं कर्म यस्य तेन

विज्ञानमेतदखिलं श्रुतिसारमेकं वेदांतवेद्यचरणेन मयैव गीतम्॥
यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः॥

ननु पाठमात्रादेतादृशमहत्फलप्राप्तिः कथमित्याशंकाभवत्येवेति स्वचयं तत्राह तु मा
ह॥ मद्वचनेषु भक्तिर्विश्वासो यदीत्यर्थः गुरुवाक्यविश्वासस्यैव फलदायकत्वादिति भावः ॥२४॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥रा·गी॥ ६२ ॥इतिश्रीमत्सकलराजचियचुडरत्नासमर्थेत्यादिविरुदावलीविराजमानस्यहि०उ

॥३५॥ त्तरकांडेसतोपंचमः सर्गः॥ ५ ॥ छ ॥श्रीसीताराम॥ छ ॥

इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडे

श्रीरामगीतायांपंचमः सर्गः॥ ५ ॥ छ ॥ छ ॥

श्रीराम॥ ॥श्रीराम॥ ॥श्रीराम॥ ॥श्रीराम॥ ॥श्रीराम ॥राम॥

॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्ता नं दोविलेको

हस्तलिखित

ज्ञान संकलिनी तन्त्रम्

क्र.सं. 302

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनंक १९७२

श्रीगणेशाय नमः ॥ कैलासशिखरासीनं देवदेवं जगद्गुरुम् ॥ पृच्छति स्म महादे-
वी ऋद्धिज्ञानं महेश्वर ॥ १ ॥ देव्युवाच ॥ कुतः सृष्टिर्भवेद्देव कथं सृष्टिर्विनश्यति ॥ ब्रह्म-
ज्ञानं कथं देव सृष्टिसंहारवर्जितम् ॥ २ ॥ ईश्वर उवाच ॥ अव्यक्ताच्च भवेत् सृष्टिर्व्य-
क्ताच्च विनश्यति ॥ अव्यक्तं ब्रह्मणो ज्ञानं सृष्टिसंहारवर्जितम् ॥ ३ ॥ ॐकारादक्षय
रात् सर्वास्तेना विद्याश्चतुर्दश ॥ मन्त्रपूजा तपो ध्यानं कर्माकर्म तथैव च ॥ ४ ॥ षड
ङ्गं वेदचत्वारि मीमांसा न्यायविस्तरः ॥ धर्मशास्त्रपुराणादि एता विद्याश्चतुर्दश ॥
५ ॥ तावद्विद्या भवेत् सर्वा यावद्ज्ञानं न जायते ॥ ब्रह्मज्ञानपदं ज्ञात्वा सर्वा विद्यास्थि-
रा भवेत् ॥ ६ ॥ वेदशास्त्रपुराणानि सामान्यगणिका इव ॥ या पुनः शाम्भवी विद्या गु-
प्ता कुलवधूरिव ॥ ७ ॥ देहस्थाः सर्वविद्याश्च देहस्थाः सर्वदेवताः ॥ देहस्थाः सर्वतीर्थानि
गुरुवाक्येन लभ्यते ॥ अध्यात्मविद्या हि नृणां सौख्यमोक्षप्रकरी भवेत् ॥ धर्मकर्म तथाज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यमेतत्॥सर्वंनिवर्त्तते॥ ८॥काष्टमध्येयथावह्निःपुष्पेगन्धःपयोऽमृतम्॥देहमध्ये
तथादेवःपुण्यपापविवर्जितः॥९॥इडाभगवतीगङ्गापिङ्गलायमुनानदी॥इडा॰
पिङ्गयोर्मध्येसुषुम्नाचसरस्वती॥११॥त्रिवेणीसङ्गमोयत्रतीर्थराजःसउच्यते॥त
त्रस्नानंप्रकुर्वीतसर्वपापैःप्रमुच्यते॥ १२॥देव्युवाच॥कीदृशीखेचरीमुद्राविद्याच
शाम्भवीपुनः॥कीदृश्यध्यात्मविद्याचतन्मेब्रूहिमहेश्वर॥१३॥ईश्वरउवाच॥मनःस्थि
रंयस्यविनावलम्बनम्वायुःस्थिरोयस्यविनानिरोधनम्॥दृष्टिःस्थिरायस्यविनाव
लोकनम्साएवमुद्राविचरन्तिखेचरी॥ १४॥बालस्यमूर्खस्ययथैवचेतःस्वप्नेनहीनो
ऽपिकरोतिनिद्राम्॥ततोगतःप्रत्योनिरावलम्बःसाएवविद्याविचरन्तिशाम्भवी॥ १५॥
देव्युवाच॥देवदेवजगन्नाथब्रूहिमेपरमेश्वर॥दर्शनानिकथंदेवतत्त्वज्ञंचपृथक्
पृथक्॥ १६॥ईश्वरउवाच॥त्रिमन्त्रीचम्भेवज्ञोवेदाभ्यासरतःसदा॥प्रकृतिवादर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताःज्ञानावैस्ताःभूत्यानिवादिनः ॥१७॥ अतोऽहं ज्ञानिनो ये वा तत्त्वज्ञा अपि तादृशाः सर्वे
नास्तीति चार्वाका जल्पन्ति विषयाश्रिताः ॥१८॥ उमा पृच्छति हे देव पिंडुवल्लाणुलक्षण
म् ॥ पञ्चभूतं कथं देव गुणाः के पञ्चविंशति ॥१९॥ ईश्वर उवाच ॥ अस्थिमांसं नखश्चैव त्व
ग्रोमाणि च पञ्चमम् ॥ पृथ्वी पञ्च गुणा प्रोक्ता ब्रह्मज्ञानेन भाषिते ॥२०॥ शुक्रशोणित मज्जा
च मलमूत्रं च पञ्चमम् ॥ अपां पञ्च गुणाः प्रोक्ता ब्रह्मज्ञानेन भाषिते ॥२१॥ निद्रा क्षुधा तृषा
चैव क्लान्तिरालस्य पञ्चमम् ॥ तेजः पञ्च गुणाः प्रोक्ता ब्रह्मज्ञानेन भाषिते ॥२२॥ धारणं चा
लनं क्षेपं संकोचं प्रसरं तथा ॥ वायोः पञ्च गुणाः प्रोक्ता ब्रह्मज्ञानेन भाषिते ॥२३॥ कामं क्रो
धं तथा मोहं लज्जा लोभश्च पञ्चमं ॥ नभः पञ्च गुणाः प्रोक्ता ब्रह्मज्ञानेन भाषिते ॥४२॥ आका
शाज्जायते वायुर्वायो रूपद्यते रवि ॥ रवेरुत्पद्यन्ते तोयं तोयादुत्पद्यते मही ॥१५॥ म
ही विलीयते तोये तोयं विलीयते रवौ ॥ रविर्विलीयते वायो वायुर्विलीयते तु खे ॥१६॥ पञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्वाद्भवेतत्स्मिंस्तत्वानतत्वंविलीयते॥पञ्चतत्वात्परंतत्वंतत्वातीतंनिरञ्जनम्॥ १७
स्पर्शनंरसनंचैवघ्राणंचक्षुश्चश्रोतरम्॥पञ्चेन्द्रियमिदंतत्वंमनःसाध्यमिन्द्रियम्
१८॥ब्रह्माण्डलक्षणंसर्वंदेहमध्येव्यवस्तितम्॥साकाराश्चविनश्यन्तिनिराकारोनशश्य
ति॥१९॥निराकारंमनोप्यस्यनिराकारसमोभवेत्॥तस्मात्सर्वप्रयत्नेनसाकारस्तुपरित्य
ज्जेत्॥ २०॥देव्युवाच॥आदिनाथमयिब्रुहिसम्भवातुःकथंभवेत्॥आत्माचैवान्तरात्माच
परमात्माकथंभवेत्॥ २१॥ईश्वरउवाच॥शुक्रशोणितमज्जास्थिमेदोमांसञ्चपञ्चमम्॥अ
स्तित्वकचैवसप्तैतेशरीरेषुव्यवस्थिता॥२२॥शरीरञ्चैवमात्मानसन्तरात्मामनोभवेत्
परमात्माभवेच्छून्यंमनोयत्रविलीयते॥२३॥रक्तधातुर्भवेन्मातास्थुक्रधातुर्भवेत्पिता॥
शुन्यधातुर्भवेत्प्राणोगर्भपिण्डंप्रजायते॥२४॥देव्युवाच॥कथमुत्पद्यतेवाचाकथंवाचा
विलीयते॥वाक्यस्यनिर्णयंब्रुहिपदपज्ञानमुदाहर॥ २५॥ईश्वरउवाच॥अव्यक्ताज्जायते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञा सं
३

प्राणाःप्राणात्प्रपश्यतेमनः॥मनसोत्प्रपश्यंतेवाचामनोवाचाविलीयते॥३६॥देव्युवाच
कस्मिन्स्थानेवसेत्सूर्यःकस्मिन्स्थानेवसेच्छशी॥कस्मिन्स्थानेवसेद्वायुःकस्मि
न्स्थानेवसेन्मनः॥३७॥ईश्वरउवाच॥तालुमूलेस्थितश्चन्द्रोनाभिमूलेदिवाकरः॥सूर्या
ग्रेवसतेवायुश्चन्द्राग्रेवसतेमनः॥३८॥सूर्याग्रेवसतेचित्तंचन्द्राग्रेजीवितंप्रिये॥एत
द्गुह्यंमहादेविगुरुवाक्येनलभ्यते॥३९॥देव्युवाच॥कस्मिन्स्थानेवसेच्छक्तिःकस्मि
न्स्थानेवसेच्छिवः॥कस्मिन्स्थानेवसेत्कालजराकेनप्रजायते॥४०॥ईश्वरउवाच॥
पातालेवसतेशक्तिर्ब्रह्माण्डेवसतेशिवः॥अन्तरीक्षेवसेत्कालजरासप्रजायते॥४१॥ ताम:
देव्युवाच॥आहारंकांक्षतेकोऽसौभुञ्जतेपिबतेकथम्॥जाग्रत्स्वप्नसुषुप्तौचकोवासौ ३
प्रतिबुध्यति॥४२॥ईश्वरउवाच॥आहारंका—तेप्राणोभुञ्जतेऽपिलनाशनः॥जाग्रत्स्व
प्नसुषुप्तौचवायुश्चप्रतिबुध्यति॥४३॥देव्युवाच॥कोवाकरोतिकर्माणिकोवालिप्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पातकैःकोवाकरोतिशापानिकोवापापैःप्रमुच्यते ॥ ४४ ॥ शिवउवाच ॥ मनःकरोतिपापा
निमनोलिप्यतेपातकैः ॥ मनश्चतन्मनाभूत्वानपुण्यैर्नचपातकैः ॥ ४५ ॥ देव्युवाच ॥ जी
वःकेनप्रकारेणशिवोभवतिकस्यच ॥ कार्यस्यकारणंब्रूहिकथंक्षिप्रप्रसादनम् ॥ ४६
शिवउवाच ॥ भ्रान्तिबद्धोभवेज्जीवोभ्रान्तिमुक्तःसदाशिवः ॥ कार्यंहिकारणंत्वंचपु
नर्वोधोविशिष्यते ॥ ४७ ॥ मनोऽन्यत्रशिवोऽन्यत्रशक्तिरन्यत्रमारुतः ॥ इदंतीर्थमिदं
तीर्थंभ्रमन्तितामसाजनाः ॥ ४८ ॥ आत्मतीर्थंनजानातिकथंमोक्षोवरानने ॥ ४९ ॥ न
वेदंवेदमित्याहुर्वेदोब्रह्मसनातनम् ॥ ब्रह्मविद्यारतोयस्तुसविप्रोवेदपारगः ॥ ५०
मथित्वाचतुरोवेदान्सर्वशास्त्राणिचैवहि ॥ सारस्तुयोगिभिःपीतंतक्रंपिबन्तिपण्डि
ताः ॥ ५१ ॥ उच्छिष्टंसर्वशास्त्राणिसर्वविद्यामुखेमुखे ॥ नोच्छिष्टंब्रह्मणोज्ञानमव्यक्तं
चेतनामयं ॥ ५२ ॥ नतपस्तपइत्याहुर्ब्रह्मचर्यंतपोनमं ॥ ऊर्ध्वरेताभवेद्यस्तुसदेवोन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुमानुष॥ नध्यानं ध्यानमित्याहु ध्यानं शून्यगतं मनः॥ तस्य ध्यानप्रसादेन सौख्यं
मोक्षं न संशयः॥ ५४॥ न होमं होममित्याहुः समाधौ तत्तु भूयते॥ ब्रह्माग्नौ हूयते
प्राणं होमकर्म्म तदुच्यते॥ ५५॥ पापकर्म्म भवेद्दुःखं पुण्यश्चैव प्रवर्त्तते तस्मात् सर्वप्र
यत्नेन तद्द्वयं त्यजेद्बुधः॥ ५५॥ यावद्वर्णं कुलं सर्वं तावज्ज्ञानं न जायते॥ ब्रह्म
ज्ञानं पदं ज्ञात्वा सर्ववर्णविवर्जितः॥ ५७॥ देव्युवाच॥ यत्त्वया कथितं ज्ञानं नाहं जाना
मि शङ्कर॥ निश्चयं ब्रूहि देवेश मनो यत्र विलीयते॥ ५८॥ शङ्कर उवाच मनो वाक्यं तथा
कर्म्म तत्तीर्थं यत्र लीयते॥ दिना स्वप्नं यथा निद्रा ब्रह्मज्ञानं तदुच्यते॥ ५९॥ एकाकी निस्पृ
हः शान्तश्चिन्तानिद्राविवर्जितः॥ बालभावस्तथा भावो ब्रह्मज्ञानं तदुच्यते॥ ६०॥ श्लोका
र्द्धेन प्रवक्ष्यामि यदुक्तं तत्त्वदर्शिभिः॥ सर्वचिन्तापरित्यागो निश्चिन्तो योग उच्यते॥ ६१
निमिषं निमिषार्द्धं वा समाधिमधिगच्छति॥ शतजन्मार्जितं तत्तु क्षणादेव नश्यति ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देव्युवाच ॥ कस्य नाम भवेच्छक्तिः कस्य नाम भवेच्छिव ॥ एतन्मे ब्रूहि भो देव पश्चात्तत्त्वा-
नुप्रकाशय ॥ ६३ ॥ ईश्वर उवाच ॥ चलच्चित्ते वसेच्छक्तिः स्थिरचित्ते वसेच्छिव ॥ स्थिरचि-
त्तो भवेद्देवि स देहस्थोऽपि सिध्यति ॥ ६४ ॥ कस्मिन्स्थाने त्रिधा शक्तिः षट्चक्रं च तथैव
च ॥ एकविंशतिब्रह्माण्डं सप्तपातालमेव च ॥ ६५ ॥ ईश्वर उवाच ॥ ऊर्ध्वशक्तिर्भवेत्कण्ठः
अधःशक्तिर्भवेद्गुदे ॥ मध्यशक्तिर्भवेन्नाभिः शक्त्यातीतं निरञ्जनं ॥ ६६ ॥ आधारं गुह्य-
चक्रं च स्वाधिष्ठानं च लिङ्गकं ॥ चक्रभेदं मयाख्यातं चक्रातीतं नमो नमः ॥ ६७ ॥ कायोर्ध्वं
ब्रह्मलोकः स्यादधः पातालमेव च ॥ ऊर्ध्वमूलमधःशाखं वृक्षाकारं कलेवरं ॥ ६८ ॥ देव्युवा-
च ॥ शिवशङ्कर ईशान ब्रूहि मे परमेश्वर ॥ दशवायुः कथं देव दशद्वाराणि चैव हि ॥ ६९ ॥
ईश्वर उवाच ॥ हृदि प्राणः स्थितो वायुरपानो गुदसंस्थितः ॥ समानो नाभिदेशे तु उदानः
कण्ठमाश्रितः ॥ ७० ॥ व्यानः सर्वगतो देहे सर्वगात्रेषु संस्थितः ॥ नाग ऊर्ध्वगतो वायुः कूर्मो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वा॰स॰
५

स्त्रीर्थानि संस्थितः ॥ ७१ ॥ कृकरः क्षोभिते चैव देवदत्तोऽपि जन्मणे ॥ धनञ्जयो नाद
घोषेनि विशेन्नैव शाम्यति ॥ ७२ ॥ एष वायुर्गिरालम्बो योगिनां योगसन्मतः ॥ न
वद्वारस्वप्रतापं दशमं मनोऽउच्यते ॥ ७३ ॥ देव्युवाच ॥ नाडीभवस्त्वमेवुहि सर्वगात्रेषु
संस्थितम् ॥ शक्तिः कुण्डलिनी चैव प्रसूता दशनाडिका ॥ ७४ ॥ ईश्वर उवाच ॥ ईडा॰
च पिङ्गला चैव सुषुम्ना चोर्ध्वगामिनी ॥ गान्धारी हस्तिजिह्वा च प्रसया गमना यता
७५ ॥ अलम्बुषा यशा चैव दक्षिणाङ्गे च संस्थिताः ॥ कुहूश्च शङ्खिनी चैव वामाङ्गे च॰
व्यवस्थिताः ॥ ७६ ॥ एतासु दशनाडीषु नानानाडीप्रसूतिका ॥ द्विसप्ततिसहस्रा॰ राम॰ ५
णि शरीरे नाडीपाः स्मृताः ॥ ७७ ॥ एता यो विन्दते योगी स योगी योगलक्षणः ॥ ज्ञान
नाडी भवेद्देवि योगिनां सिद्धिदायिनी ॥ ७८ ॥ देव्युवाच ॥ भूतनाथ महादेव ब्रूहि मे
परमेश्वर ॥ त्रयो देवाः कथं देव त्रयो भावस्त्रयो गुणाः ॥ ७९ ॥ ईश्वर उवाच ॥ रजोभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थितो ब्रह्मा सत्त्वभावस्थितो हरिः ॥ क्रोधभावस्थितो रुद्रस्त्रयो देवास्त्रयो गुणाः ॥ ८०
एकमूर्त्तिस्त्रयो देवाः ब्रह्मविष्णुमहेश्वराः ॥ नानाभावं मनो यस्य तस्य मुक्तिर्न जायते
८१ ॥ वीर्यारूपी भवेद्ब्रह्मा वायुरूपस्थितो हरिः ॥ मनोरूपस्थितो रुद्रस्त्रयो देवास्त्रयो गु
णाः ॥ ८२ ॥ दयाभावस्थितो ब्रह्मा शुद्धभावस्थितो हरिः ॥ अग्निभावस्थितो रुद्रस्त्रयो
देवास्त्रयो गुणाः ॥ ८३ ॥ एकं भूतं परं ब्रह्म जगत्सर्वं चराचरं ॥ नानाभावं मनो य
स्य तस्य मुक्तिर्न जायते ॥ ८४ ॥ अहं सृष्टिरहं कालो ऽप्याहं ब्रह्माहं हरिः ॥ अहं रुद्रो
ऽप्यहं शून्यमहं व्यापी निरञ्जनम् ॥ ८५ ॥ अहं सर्वात्मको देवि निष्कामो गगनोप
मः ॥ अभावनिर्मलं स्नानं सर्वाहं नेव संशयः ॥ ८६ ॥ जितेन्द्रियो भवेच्छूरो ब्रह्मचारी
सुपण्डितः ॥ सत्यवादी भवेद्दुर्जो दाता धीरो हिते रतः ॥ ८७ ॥ ब्रह्मचर्यं तपो मूलं ध
र्ममूलं दयात्मना ॥ तस्मात्सर्वप्रयत्नेन दयाधर्मं समाश्रयेत् ॥ ८८ ॥ देव्युवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रा·सं
६

योगेश्वरंजगन्नाथउमायाःप्राणवल्लभ ॥ देवसंध्यातपोध्यानंहोमकर्मकुलंकथं ॥
८९ ॥ ईश्वरउवाच ॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ ब्रह्मज्ञानंसमंपुण्यंक-
लांनार्हन्तिषोडशीम् ॥ ९० ॥ सर्वदासर्वतीर्थेषुयत्फलंलभतेशुचिः ॥ ब्रह्मज्ञानं
समंपुण्यंकलांनार्हन्तिषोडशीम् ॥ ९१ ॥ नमित्रंनचपुत्राश्चनपितानचबान्धवाः ॥
नस्वामीचगुरोस्तुल्यंयद्दृष्टंपरमंपदं ॥ ९२ ॥ नचविद्यागुरोस्तुल्यंनतीर्थंनचदेवता
गुरोस्तुल्यंनवैकोऽपियद्दृष्टंपरमंपदं ॥ ९३ ॥ एकमप्यक्षरंयस्तुगुरुःशिष्येनिवेदये-
त् ॥ पृथिव्यांनास्तितद्द्रव्यंयद्दत्वाचानृणीभवेत् ॥ ९४ ॥ यस्यकस्यनदातव्यंब्रह्मज्ञानं
सुगोपितं ॥ यस्यकस्यापिभक्तस्यसन्तगुरुस्तस्यधीयते ॥ ९५ ॥ मन्त्रपूजातपोध्यानं
होमंजप्यंबलिक्रियां ॥ सन्न्यासंसर्वकर्माणिलौकिकानित्यजेद्बुधः ॥ ९६ ॥ संसर्गाद
हवोदोषाःनिःसङ्गाच्चवैगुणाः ॥ तस्मात्सर्वप्रयत्नेनयतीसङ्गंपरित्यजेत् ॥ ९७

राम
६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकारः सात्विको ज्ञेय उकारो राजसः स्मृतः ॥ मकारस्तामसः प्रोक्तस्त्रिभिः प्रकृतिरुच्य
ते ॥ ९८ ॥ अक्षरा प्रकृतिः प्रोक्ता क्षरः स्वयमीश्वरः ईश्वरान्निर्गता सा हि प्रकृतिगु
णावस्थता ॥ ९९ ॥ साम्नायापालिनी शक्तिः सृष्टिसंहारकारिणी ॥ अविद्या मोहि
नी या सा शब्दरूपा यशस्विनी ॥ १०० ॥ अकारश्चैव ऋग्वेद उकारो यजुरुच्यते ॥ म
कारः सामवेदस्तु त्रियुक्तो ऽथ्यथर्वणः ॥ १०१ ॥ ॐकारस्तु स्मृतो ज्ञेय स्त्रिनाद इति संज्ञि
तः ॥ अकारस्त्वथ भूर्लोक उकारो भुव उच्यते ॥ १०२ ॥ सव्यञ्जनमकारस्तु स्वर्लोकस्तु
विधीयते ॥ अक्षरैस्त्रिभिरेतैश्च भवेदात्मा व्यवस्थितः ॥ १०३ ॥ अकारः पृथिवी ज्ञेया
पीतवर्णेन संयुतः ॥ अन्तरीक्षं उकारस्तु विद्युद्वर्ण इहोच्यते ॥ १०४ ॥ मकारः स्वरिति
ज्ञेयः शुक्लवर्णेन संयुतः ॥ ध्रुवमेकाक्षरं ब्रह्म ओमित्येवं व्यवस्थितः ॥ १०५ ॥ स्थितामम
नो भवेन्नित्यं चिन्तानिद्राविवर्जितः ॥ आशु सञ्जायते योगी नान्यथा शिवभाषितं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञा.सं

७

१०६॥ यत्रूदंपचतेतेनित्यंश्रृणोतिचयदितेयदिजेसर्वपापविसुद्धात्माशिवलोकंसगछ-
ति॥१०७॥देव्युवाच॥स्थूलस्थूलक्षणांक्क्रहिकथंमनोविलीयते॥परमार्थञ्चनिर्वानं-
थुलसुक्ष्मस्थूलकारां॥१०८॥शिवउवाच॥येनज्ञानेनहेदेविविद्यतेनचकिल्बिषी
पृथिव्यापस्तथातेजोवायुराकाशमेवच॥१०९॥स्थूलरुपीस्थितोयश्चसूक्ष्मश्च अ-
न्यथास्थित॥११०॥इतिज्ञानसङ्कलिनीतन्त्रसमाप्तः॥ ॥शुभम्॥ ० ॥

६.५

रामः

७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDP

दत्ति कौस्तुभः

(स्मार्तज्योतिष)

शब्द, कौस्तुभः

क्र.सं. २०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दकौस्तुभः

गोपालभट्टस्य पुस्तकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि॰ व्या॰ ॐ श्रीविघ्नहर्त्रे नमः॥ ॥विषयमिति। विषये कथिते तत्प्रतिपत्ति
१ रूपप्रयोजनमप्युक्तप्रायम्। प्रयोजनमाहेति केयचोक्तं चिन्त्यं। वि
षयाकथनेन न्यूनत्वात्। द्योतक इति। इदं न साध्यं॰ अनर्थकनिपातानाम
पि दर्शनात्। किं तु वाचकत्वाभाव इति तदाह नत्विति। प्रकृते चशब्दानुशास
नपदस्य लक्षणा। प्रादिसमभिव्याहारे निपातोः प्रकृष्टजयादिविव॰ केवलप्रयो
गस्य प्रादिवदेषामपि॰ एतेन वाचकपदसमभिव्याहाराभावे अथशब्दस्य न द्यो
तकतेति परास्तं। यद्वा। शब्दानुशासनमित्युक्ते वाक्यार्थसमाप्तये क्रियाध्याहा श्रीः
र आवश्यकः। तत्रानियतक्रियाध्याहारे प्रसक्ते अथशब्देन क्रियान्तरव्यवच्छि रामः
द्य प्रारंभरूपैवात्र क्रिया विवक्ष्यते। इदमेव चाथशब्दस्य द्योतकत्वं नामेति।
६२ सामान्येति। व्याप्यधर्मोपस्थितौ व्यापकधर्मोपस्थितेरावश्यकत्वादिति भावः। १
वक्ष्यतीति। समुच्चितानभिधानान्निकृष्टसमुच्चयानभिधानान्नभेदानिवंध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चे२ भावा२ ते

ना षष्ठी निवार्यम्। तथा सति सत्त्ववाचित्वाद निपातत्वाद नव्ययत्वे विभक्तिः स्यादिति भावः। य
थेति। सुंदरः समुच्चय इत्यादौ। ननु शब्दशक्तिस्वरूपात्पवेति पाकेदृत्यादौ रिव वा दिवा च
स्यात्तत्वे भूततो मातिन विभक्तिश्रवणासमुच्चिताभिधानाच्चेन भेदनिर्वचना षष्ठीने
चाविशेषणायोगानवच्छिन्नत्वतिसंकोवाऽत आह अपिवेति बोधकेतापीति अपिना
ल५ तादृशस्य वाच्येते नामार्थयोरभेदान्वयदृस्य संग्रहः चेत्तुर्विचेति। नामार्थाताप
सर्गनिपातत्वे इत्यर्थः। अनुपादानादिति। प्रयोजने नाभावादिति भावः। अस्तु
भयप्राप्तिरिति। उभयप्राप्ताविति सूत्रं तु प्राप्तिग्रहणो लो [redacted] उभयोः क[redacted]र्तृकर्म
णोर्यत्र सामर्थ्यप्राप्तमुपादानं तत्रैव प्रवर्त्तते न त्व समतरप्रयोग इति भावः। संबंधवि
शेषेति। प्रतिपाद्यप्रतिपादकभावः। शब्दांतरेति। नानाजातीयेत्याकारकसतीत्यर्थ
ः। अत एवेति। वाच्यवाचकभावसंबंधसत्त्वादेवेत्यर्थः। अर्थसंबंधिनस्तस्य शब्दस्य
अन्वहेतुकं। अर्थात्तत्वहेतुकं। स्वरूपैवैतद्वयं तच्छतेरिति सूत्रे वाचे ते२
स्यलेकस्यतरेच। अत एव गोत्वेति। [redacted] १x

वि॰भू॰ ज्ञानमात्रे विशेषणत्वस्वीकारादेवेत्यर्थः। ~~तत्र~~ प्रत्यय इति। तत्र हि निष्ठायां सेटीति प्रत्याख्यायेऽनाग
मेपाठेन मितिस्यादित्याशंकायां णेरध्ययने इत्यत्र लोपि तियोगं विभज्य एवं तान्निष्ठायामित्येने
२ तिव्याख्यानतो वृत्तं वृत्तेरेवं निष्ठायां। णेलोपो नात्यस्य तद्वाध्ययन एवेति सिद्धान्तितं। ए
श्री४ तेनेति। उपायानामव्यवस्थितत्वात्कटुचटादीनां नानात्वेनेत्यर्थः। शारकीकर्त्तव्येति। शंक्याऽप्रय
त्वेनेत्यादिः। वर्णस्फोटेति। एतत्पक्षे प्रकृतिप्रत्ययाभ्यां स्वस्वरूपेणार्थोपस्थितिः। पदस्फो
टेत्यत्र पदशब्देन सुप्तिङन्तं। अत्र प्रकृतिप्रत्ययाभ्यां न स्वार्थोपस्थितिः। किंतु समुदायेने
व समुदितस्येति। वस्तुतस्तादृशप्रकृतिप्रत्ययसंमोहेऽनतथावश्यकत्वात्। अनावश्यकेति। न
त्वानुपूर्वीविशेष विशिष्टवर्णानामेव व्यंजकत्वमवश्यं वक्तव्यं। अन्यथा सरो रस इत्यादौ
श्री५ अर्थविशेष प्रतीत्यनापत्तेः। एवं चानुपूर्वीविशेषविशिष्टानां तेषामेव वाक्यत्वोपपत्तौऽअ
तिरिक्त तत्कल्पनाऽसंगतेरिति वाच्यम्। संनिवेशविशेषविशिष्टत्वं त्वादीनामेव घटत्वो
द्युपपत्तौऽतिरिक्त तत्कल्पनानापत्तेः। यत्तु वाक्यशक्तिग्रहे पदशक्तिग्रहः कारणं प्रत्ये राम:
कपदशक्तिग्रहाभावे वाक्यार्थबोधस्यानुदीयमानत्वात्। प्रत्येकशक्तिग्रहसत्वे चापूर्ववा २
क्यश्रवणे पितस्यजायमानत्वादिति। तन्न। वाक्यशक्तिग्रहे नदभावादेवाद्येतदभावोपप

अ॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वा दिवोर्थ्यं ५ ×४ तत्तद्वर्णजनकतावच्छेदक वैजात्यमादाये वो

नेः। प्रत्येकपर्दशक्ति यद्योपि विशिष्टे विशिष्टपर्वक्तियद्योपि जायमानस्य बोधस्य लक्ष
तेऽभावापत्तेश्चेतियत्किंचिदेतत्। पक्षांतरमाह अस्मिंश्चेति। व्यंजकध्वनीति।
व्यंजक गतविशेषापहितो ध्वनिगता विशेषापहितश्चेत्यर्थः। अयं भावः। त
त द्वर्णव्यंजकत्वेनाभिमतवायुसंयोगनिष्ठवैजात्यमेव परंपरासंबंधेन स्फोट
८५ वृत्तिरिति। शाक्षाश्रये नकारस्याकृतिस्मारकसंबंधेनेत्यर्थः। वृत्तिमत्ता
दिति। साक्षाद्बोधकत्वाभावान्नोताद्दशसंबंध एव चक्तव्यादित्य हे प्रकारतावच्छेद
कतयाभासते। स एव चास्य वृत्तिनियामक इति नातिप्रसंगः। तस्य चाभिव्यंजे
कानानाजातीयावायुसंयोगाः। तत्र तद्वायुसंयोगा पि व्यक्तस्फोटनामभि
व्यक्तेः। क्षणिकत्वेपि पूर्वपूर्वसंस्कारसहकृतचरमोत्रेण वर्णसमुदायग्रहण
वदेव ग्रहणं बोधकारणतावच्छेदकं च घटत्वेनाभिव्यक्तस्फोटस्य वहितोत्तरट
ते नाभिव्यक्तस्फोटमेव परेषामिवास्माकमपि। तदर्थं ज्ञापकत्वज्ञानमपि चर
मवैजात्यविशिष्टस्फोटश्रवणएवेत्येकवर्णविकल्पत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा.म.: वर्णेनैवार्थोपपत्तेः। यद्वा· वर्णाग्रहणेऽनुभवसिद्धगत्वमात्रेण तत्तद्ध्वनिनिष्ठवैजात्यमेव परंप
३ रया कत्वादि· स च न स्फुटः उत्पत्तिप्रतीतिस्तु व्यंजकनिष्ठाया ध्वनिनिष्ठाया वोत्पत्तेः परंपर
यावर्णे वृत्तेस्तामादाय· सा प्रात्संबंधांशे तुल्या घयाद्भ्रमत्वं। न चैवं ककार॰ ककारयोरैक्या
पत्तिर्भिन्नप्रतीत्यनापत्तिश्चेति वाच्यं। व्यंजकनिष्ठयोर्भेदेन तदोषाभावात्· विशेष्यांश
मात्रार्थमेदस्तित्वष्ट एव तदाह· अत एवेति। यथा चेति। अयं चाखंडपदस्फोटपक्षे दृष्टांत
ः· तत्र हि एकाक्षरपदेष्वनुभूतककत्वादिरन्यत्रारोप इति तद्भावः। न चैवं वायुसंयोगेष्वे
व कत्वादिकमस्तु। तस्य च विजातीयस्यास्तु भावणं। यद्वा· ध्वनिनिष्ठमेव कत्वादिकं ते
षामेव वा चकत्वास्तु· न तव्यतिरिक्तः स्फोट इत्यत आह· जातीति· तत्सोपाधिरूपमिति। उपा
धेरूपं स्वरूपं व्यावर्तकमवच्छेदकं· परंपरेति। क्रमीयवर्णवृत्तित्वसंबंधः। अयंभावः। रामः
बहूनां वर्णानां वाचकत्वे वर्ण समुदायरूपपदवाक्ययोस्तदतिरिक्तयोर्वा तत्त्वे गौरवा
त्· तद्गता जातिरेव तथा। तत्र वर्णगता जातिः रामायेत्यादौ कारोत्तरमत्वं यत्वादिशक्ते ३
रा॰

श्री ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नावच्छेदकतया पराभिमतं। यथा घटेनेति पदगताघोत्तरत्व [illegible] त्तदुत्तरत्वादिरूपा तदवच्छेदकतयाभिमता·
एवं वाक्यास्फोटेपीति। नित्येष्विति। अत्र नित्यत्वं व्याकरणनिष्पाद्यत्वमेव। न तु कूटस्थत्वा। घिभेघातेनोत्पाद्यत्वा
भावः। अत एवानपायोपजनविकारिणीति भाष्ये तल्लक्षणः संगच्छते। न वेति सूत्रे भाष्ये तथैवोपक्रमोपसंह
पं४ रिष्यामीत्येतच्च। आकृतिरिति। एतेन च पक्षे दाचाध्यमेदेनेति तत्वं। वर्णस्फोटेति। शब्दान्तरं समुदायं प्रतिपद्यत इत्य
नेन वर्णस्फोटः। समुदायत्वोक्तिः। एतयानुपूर्व्या पश्चाद्वात्तरमुपादिशतीत्यनेनाद्वितीयः। यत्तु केयटेनान्ति
नद त्यशब्दप्रतिपत्तये ऽखंडाः शब्दा वर्णवदनर्थकोपलभ्यमानावयवा इत्याद्युक्तं· तदत्रत्याद्वितीयप
भित, पक्षेनतुश्राद्धे ऽवयवानसंत्येवेत्यभिप्रायेण· तत्रावयवशब्देन च प्रकृतिप्रत्ययादिरूपा इत्यर्थः। न
तु वर्णा अपि संतीति तत्स्वार्थः। मानाभावात्। अत एव वर्णवदिति दृष्टान्तः संगच्छते। वर्णायमाणोपलभ्य
मानावयवा एव न तु वस्तुगत्याविद्यमानावयवा इति तदर्थः। एवोंपमर्देति। एवं एवं चो अपेक्षयोत्त
पं४ रोत्तरवोद्धृत्तत्वलक्षकोधवृत्ति धर्माश्रयत्वादिति भावः। मद्वा। आकांक्षादिनासंसर्गलाभ इति वर्ण
स्फोटपदस्फोटवादिनोर्मतं तदुपमर्दकत्वं वाक्यस्फोटस्य संसर्गस्य वाक्यशक्यत्वमिति तन्मतात्·त
दुपपत्तिश्चान्यत्र स्फुटा। दुरुपपादकतयेति। न चैतादृश [illegible] विषये स्थानिनएवोपस्थापकाल्प्याकरण
मेदेनस्थानिनामननुगमेपि न दोषः। स्मारकाननुगमस्यादोषत्वात्। न हि कसंवेदि दर्शनेनापर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल०

विष० संबंधिस्मरणेऽप्यतिविधी अनुगंतुं शक्यते। यदा तद्विषयसंस्कारोद्बोधस्यैव स्मरणे संभवादिति वा
४ च्यं। अनधीतव्याकरणस्य बोधाजापत्तेः। शक्तिभ्रमाद्बोधांगीकारे तु यत्र शक्तिकल्पनमेव
न्याय्यमित्यलमत्र विस्तरः। ज्ञेय इति। प्रमाणपरतंत्रज्ञाने विध्यसंभवात् षडंगवेदाध्ययनफ
लत्वेनैवैतत्कीर्तनमित्याहुः। बोध्यमिति। अत एव रक्षादिप्रयोजनसत्वेपि न नित्यत्वहानिः। नह्य
प्रयोजनं नित्यं किंतर्हि यदकरणे प्रत्यवायस्तदिति भावः। न च व्याकरणाव्याकृतवाक्यसंदर्भसं
रक्षणवदध्येतृपरंपरयैव पद[illegible]दरक्षणस्याप्युपपत्तिरित्यत आह। संभाव्येरन्निति। उपकारीति।
लंत्य० इयमेव चेति कर्त्ताकांक्षेत्युच्यते कथमित्याकारां। मंत्राभपीति। तेषामध्यनांगजातवद्धिकर्तो
षकृतितोऽतिदेशेनैव लाभ इति ध्येयं। प्रयोगेति। यद्यपि वेदभाष्ये ओविजीत्यस्यैव तद्रूपमिड
भावश्च च्छांदसत्वादागमशास्त्रस्यानित्यत्वाद्वामाकं पिष्टा इत्यर्थ इत्युक्तं। विजिरः कंपनार्थत्वा राम:१
यथात्मनामनेकार्थत्वाद्भयणोपपत्तिरिति तद्भावः। तथापि तदपेक्षया छांदसत्वादिकल्पनागौ ४
रीयसीत्यभिप्रायः। कर्मधारयेति। ननु कर्मधारयस्य लघुत्वात्संदेहानुपपत्तिरिति चेन्न। अस्य षष्ठ
र्थस्याग्निवारुणीपदस्य समत्वेन बहुव्रीहेरपि संदेहसंभवात्। न च व्याख्यानान्निर्णयः। पौरुषे
येतथासंभवेपि अपौरुषेये वेदे इष्टार्थविषये तथाऽसंभवात्। निश्चिनोतीति। अवैयाकरणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विपरीतं त त्वरूपमेवाध्यवस्येदिति भावः। हवेतिप्रसिद्धौ। निंदार्थवचनादिति। निंदा च शास्त्रबोधित
विपरीतोच्चारणे न पापसाधनत्वात्। अत एव कर्तव्यंगत्वं। यथाश्रुते प्य यज्ञकर्तृस्य मंदोच्चारणे
न किंचिद्दृष्टवैगुण्यं भवति। द्रव्यसंस्कारेति। यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणो
तीति दर्शपूर्णमासप्रकरणे वाक्यं। मंत्रेति। दुष्टः शब्द इति भाष्यपाठः। तत्रापशब्दप्रयोगे प्रत्यवा
यप्रतिपादनार्थं यं शिक्षास्वरेण वर्णेन वान्यथाभूतो दुष्टः प्रयुक्तः स मम चेत्यर्थः। न केवलं त
मर्थमेवाह। अपि तु स वाग्वज्रं यजमानं मारयेदित्यर्थः। हिनस्तीति लेट्प्राकुः। तथेति। वृत्रेणा
ले रध्य इति कैयटेनु पररूपहेतोर्वृत्रेणेति तृतीया बोध्या। शातयितेति। अनेन धातुशब्दस्य क्रिया
शब्दत्वं दर्शयति सपत्नपर्यायत्वे हि समासयोर्भेदेन स्यादिति बोध्यं। वेदेति। त्रैधातवीयेष्टे
रर्थवादे आपस्तंबशाखायां संहितायामर्थवादः पठ्यते। अमपोच्चारणे न यागस्य वैगुण्यबोध
नायेति तद्व्याख्यायां भट्टभास्करे स्पष्टमेतत्। ऊहितमिति। स्वेच्छया प्रयुज्यमानमित्यर्थः।
न तु वेदपठितमंत्रेष्वर्थापत्त्यादिवदूह्यमिति बोध्यं। असंभवादिति। ननु त्वदुक्तविभागेऽ
पात्तं छंदसीत्यस्य संकोचकल्पनापेक्षया यज्ञकर्मणीत्यस्य संबंधकल्पने लाघवासुन

नापेक्षया यज्ञकर्मणीत्यस्यासंबंधकल्पना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४ ध्वत्वेन स्मरणेतेसावश्यकत्वात्। हरदत्तेनोक्तत्वाच्च। तस्मात्कैयटोक्तः पर्युदासपक्ष एव ज्यायान्। न च पर्युदासपक्षे

विभाषाग्रहणं व्यर्थमेवेत्यत आह। उक्तेति। किंचिदिति। अत्राहुः चिबीजं तु विभाषा छन्दसीत्यत्रा छंद

सीति च्छेद एव विभाषाग्रहणं सर्वमत एवावश्यकमिति। किं च प्रसज्यप्रतिषेधपक्षेपि सामर्थ्यादेव य

५ त्कर्मणीत्यस्य निवृत्तिसिद्धौ विभाषाग्रहणं व्यर्थः। न चोहितेषु नित्यमन्यहिते सुवेति व्यवस्था संभवः

। कर्मग्रहणसामर्थ्यं न ऊहिता न्यहितयोरुभयत्रापि यत्र कर्मणीति सूत्रे कर्मग्रहणं व्यर्थं जपादीना

मकरणत्वेनाकरणमंत्रत्वेनसाध्यत्वं गमं त्रत्वेनवासा जा [illegible] समार्ग्रहीतितत्सार्थक्यात्। अत

एवईवत्वेति शाखाछेदन मंत्रो वृष्येकश्रुतिर्भवत्येव केषांचित्स्वयं प्रपठनं तु प्रमादिकं। सूत्रविरु

द्धं च। ऊहेषु नैकश्रुतिः ऊहा अमंत्रा इति पूर्वमीमांसा आपस्तंबा ततु कैयटविभाषा छंदसीति सूत्र

स्य हरदत्तादीनां सर्वेषां सम्मतमेव। इन्द्रशत्रुप्रसक्ताव भट्टभास्करस्वरसोप्येवमेवेत्यलं। द्वन्द्वे पदवेण

। समासेपीति। अपि नो रुचिर्बोधिता। समासाभावे बाधकाभावः। छंदो गाभावाच्च कथंगतिसंज्ञेति। २८

पर्यन्तइति। तथा च कार्यो इत्ययुक्तमिति भावः। स त्वदेवेति। सत्वेन साधुशब्दप्रयोगाख्येनदीव्यतिर्वर्तत इति स ५४

स्य देव इत्यर्थः। विभक्त्यापीति। तालुप्राप्यप्रकाशं तत् इत्यपि बोध्यं। साधुतापत्तेश्चेति। किं च वक्ष्यमाणरीत्याऽप रामः

भ्रंशेष्वपि शक्तिस्वीकारेण तेषां तिव्याप्तिर्बोध्या। शक्तेति। शक्तत्वं शक्ततावच्छेदकत्वं। शक्यतावच्छेदके शक्य ५

त्ववत्। शक्तत्वावच्छेदकेपि तत्त्वं वा। जातिविशेषो वेति। न च क्रमिकवर्णसमुदायात्मकपदस्य योगपद्यासं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवात्। अनारम्भे तु गोशब्दे गोशब्दत्वं कत्वं भवेदिति न्यायेन गोपदत्वादिजातिवत्साधुत्वमपि जातिर्वे
त्युमशक्येति। वाच्यम्। परत्वाद्विभावे इति। कुत्साद्यविवक्षायां षिभावश्चरितार्थः। न चान्तरंगोषि
भावः। कुत्सनाद्यर्थसापेक्षत्वेनाकचो बहिरंगत्वात्। स्पष्टं चेदं कुत्सलुप्यज्ञातसूत्रे कैयटे इति वाच्यं।
सा४ अंगसंज्ञापेक्षत्वेन षिभावस्यापि समत्वात्। प्रकृतिप्रत्ययविशेषापेक्षत्वाच्चेत्याहुः। गोरन्वमिति।
इदमुपलक्षणं व्यभिचारेपि बोध्यः। वाच्यमिति। अस्य मते व्यक्तिवाचो निर्विकल्पक एव। अतस्त्व
न६ स्यापि लक्ष्यतावच्छेदकस्य शब्दे भावत्। उपलक्षणतया शक्यतावच्छेदकजातेरेव वा प्रकारतया भानं
शक्ति१ व्यक्तिज्ञानस्य तादृशबोधे एव कारणत्वमित्याहुः। जातिपरत्वे इति। जातेर्विशेष्यत्वे इत्यर्थः। शक्ति
न८ ग्रहोपजीवकमिति। बहुव्रीहिरयं। प्रयोगस्येति। काव्यनाटकादिकं तु नात्यन्तं वर्जितापशब्दमिति
न परिगणितं। काव्यदोषेष्वपशब्दत्वगणनं तु प्रक्रान्तानपभ्रष्टशब्दत्वेनैः प्रक्रमभंगे एवान्तर्भव
श्र ति। पाठसामर्थ्यादिति। श्रोक्रमप्रत्ययां तस्याध्ययनार्थेनान्यथासंभवादिति [redacted] भावः। कुत्स
सूत्रेति। निरुक्तेति प्रचुरपाठः। दुर्वाराधात्विति। निर्वि विकित्सः शक्तत्वप्रत्ययस्य बाधकं वि
नाभ्रमत्वकल्पनस्यायुक्तत्वादित्यपि बोध्यं। लक्षणादेस्त्वप्रसंग एव। तस्याश्रपान्तः शक्तिपूर्वक
त्वात्॥ ॥इति श्रीकौस्तुभविषमव्याख्यायां प्रथमाध्यायस्य प्रथमपादे प्रथमाह्निकं॥ ॥ ॥

स रा३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि.म. अविवक्षितत्वादिति। अनुकार्यानुकरणयोरभेदविवक्षयेतिभावः। अनुकार्यप्रतीतिस्तु सा दृश्यसं
बंधेन नत्वभिधाव्यापारेण। अर्थवत्सूत्रे च तस्याऽर्थवत्वं विवक्षितं। न तु यथाकथंचित्। अपदं नप्र
॥६॥ युंजीतेति निषेधस्त्वनुकरणातिरिक्तविषय इतिभावः। भज्येतेति। दीर्घे हलां ग्रहणस्यान्तत्वाच्चा
त्वज्ञातिषेधे शाकारस्यापि धङ्गतिवार्तिकोक्तदोषः। अगृहीतथाक्तिकत्वादिति। जनितबोधात्वनपुनर्वोधः
आनित्वाहाति। अर्थवत्ताविवक्षयाधिभक्त्यभावेन पदत्वाभावान्न दघटितस्यैववाक्यत्वात्स्रकृतेत
द्भावाचिंत्यमेतत्। विभक्त्यन्तपदसजातीयघटितत्वेन वाक्यत्वात्तु कृपक्षाभिप्रायेणवाक्यपंचि
८ प्वा घोऽयमित्यकुः। कालव्यवायादिति। कालव्यवधानानुष्ठितज्योतिष्टोमादीनांफलाजर्कनेत्वन्त
धोच्चारितपदस्यापि पुण्यजनकत्वानापत्तेऽस्माधुत्वप्राप्तं निवर्त्यत इति भावः। सुजातेइतिवृ
येकारोकारावेतयोरेवमतेइत्यर्थः। अर्धौकारस्तु न्न्न.. खेषाम्वलायनानामपीतियोज्यं। एते
नार्द्धैकारस्याश्वलायनानामपिसत्वेनैवकारासंगतइतिपरास्तं। पक्षाङ्गिर्देशासामर्थ्यादितिद रामः
क्रिरादेचपूर्वोनु. ताभ्यामेच् प्लुतावेच इ. त्याघर्थपक्षाङ्गिर्देशस्यावश्यकत्वाच्चिंत्यमेतत्। ६
तत्रेति। श्रुतार्थान्यथानुपपत्त्यायायत्तस्त्रो तो पपादकंकल्प्यं तत्त्वसन्निहितमेवनासंनिहितमि
त्यङ्विषयकमेस्तापकं नाकारादिविषयकमितिभावः। नाङ्लावितिमत्वाख्यानपरम्भाष्यमपि
पं२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगविभागरूपाघलाधिक्यात्सावर्ण्यप्रसक्तेः सम्यगेवेत्याहुः। सावर्ण्येति। दीर्घलसहेत्यादिः। ज्ञापकेति।
ईदूदेदित्सत्र वक्ष्यमाणरीत्या चिंत्यमिदं। एकएवेति। स एवायमिति प्रत्यभिज्ञानादृष्टकत्वोकारप्रयोज
यतिइत्यादिप्रयोगाश्चेति भावः। निवर्तितत्वादिति। पूर्वीसंस्थोत्तरयागोत्यामुख्यया वाचा ध्यत इति
ग्रा४ भावः। नित्स्फोटेति। ननु तदाश्रयाभ्याशास्त्रप्रक्रियेति भावः। सावर्ण्येति सावर्ण्यादिव्यवहारस्तु ध्वनिगत
दीर्घत्वादिभिः काल्पनिकं भेदमादायेत्याहुः। अनवत्वादिति। विवृतत्वाभावेदित्यभिमानः। अविशेष
णेति। संवृत[illegible]स्याणुदित्सूत्र इस्वाऽसिद्धत्वाभावादिति भावः। तज्ज्ञोन्यध्वनीति। वर्णनित्यतापक्षे इदं।
तेन न तज्जातीयेति। न चैकस्मिन्जात्याश्रये तल्लिंगं धनकार्ये विशिष्टो शास्त्रं चरितार्थं। आश्रयान्तरेका
र्थे न प्रयुंजीतेति वाच्यं। सामान्यशास्त्रस्यापवादकमंतरेण विशेषोपसंहाराभावादनियतविशेषबोध
संहारे च सर्वत्र कार्यप्रसक्तेरनिवारणादित्याहुः। ननु जातिनिर्देशेऽपूर्वत्वस्याविवक्षितत्वादिति ग्रन्थ
विरोधोऽत आह। अथवेति। अर्थाध्याहारेणेति। तद्वदत्रेति भावः। लोपत्वादिति। यद्यपि पदस्याध्याहारेणोना
मानुमानं उपनीतभानं वा। तथा च तस्मिन्सत्यपि लोपोऽप्रयोगश्चाभ्यासेव तथापि इदं शेरूच्चारणमात्रेप्र
योगाभावात्। ज्ञानमात्रे प्रयोगाच्च स्थाने पदस्य च स्थानं स्थितिर्वर्तते। ननु ज्ञायत इति। अर्थाश्रयाज्ञानेपि
अनुपपत्तितादवस्थ्येनार्थाध्याहारज्ञापकत्वात्। अप्रयुज्यमानस्येति व्याख्यानुसंदधोधार्थेति न कश्चि
लघुद्रोपद्रवः। अन्यथास्मादृशस्यारस्य संबंधेनोपस्थितस्य शाब्दबोधाविषयत्वे। पूर्वपक्षः। प्रत्ययलोपे इत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दि० भाष२

सि·म· सिर्नेप्रत्ययस्यानुमानिर्देशज्ञानं किंतु तदभावे प्यतिदेशात्कार्यसिद्धिरिति दिक्। दीर्घसंज्ञापेति। अचूत्वसं
पादनद्वारेत्यर्थः। प्लुतोप्यपेति। तद्विधावचइति परिभाषादस्वरसंधिस्यतान्चै। एवंचेति। उपदेशे सती
त्यर्थः। कथंचिदिति। अचत्व ज्ञापनद्वारेति भावः। समुदायस्य अकारस्य लकारादेशात्तु अत्वस्यास्यास्य
लाश्रयत्वात्प्रकृते न्यायो न प्रवर्तेत। अरवत इति न्यासे स्यान्वलाश्रितत्वात्स्यानिवद्भावेन निषेधश्च
स्यादत आह। रेफस्येति। कर्तव्य एवेति प्राग् उक्तसाचामिति योगविभागे न सिद्धं इदमपि व्यर्थमेवेति लु
कारोपदेश फलं चिन्त्यमेवेति भाति। अइमेद इति। प्लुतावेचइदुताविति सूत्रे भाष्यस्य एमेतत्। प्रत्याख्या
तमेवेति। भाष्यकारैरित्यर्थः। तथा च भाष्यविरोध एषतदंगीकारे दूषणमिति भावः। वानकर्तव्यमिती नेट
ति। अर्धेकारादेः सत्वेपि वर्णोपदेशे दीर्घोच्चारणसामर्थ्यात्तस्यैवोकालइति संज्ञाविधाने नैतास्य रतए
हलोह्रस्वविधिविधेयतायाएवाभावादिति भावः। अकारोनेति। सहि रपरत्वे नाकारस्यान्वर्तमत्वात्या
दो५ तः। एतावितिभवतावपि कस्मार्थसाधकावेवेति बोध्यं। तस्यैवेति। वृद्धादेत परत्वनिर्देशे नेत्यादिः।
स्यादेवेति। प्रत्या[redacted]हारेषु तद्वा स्ववाच्येषु निरूढलक्षणेति पक्षेपि तुल्यमेतत्। लक्ष्यतावच्छेदका राम:१
ज्ञानादित्याकुः। दीर्घपीरपमिति। तपरसूत्रापरत्वेति भावः। इकारोनेति। तपरसूत्रे प्रतिजयत्नस्यासिद्ध
६२ त्वात्प्रकाधिकाराववेवेति भावः। [redacted]दुमिति। हलवृति दीर्घनिवृत्त्येति भावः। ननु हि दिति। न च स्वरिता
र्थमेवतत्स्यात्। संज्ञायां तितप्रयुक्तफला दर्शनात्तित्त्वरितमित्यस्यसाक्षाज्ञितिचारितार्थ्याच्च। साक्षा

६२ कौर६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फलवतीत्वं संज्ञाशास्त्रस्य चरितार्थत्वाच्च भाष्यप्रामाण्यात् आदेशान्तकारि इत्संज्ञाप्रवृत्त्यभावः इत्याहुः। सामर्थ्ये
ति। भाष्यमानस्याप्युकारस्य सवर्णग्राहकत्वमतेऽदन्ततान्तरेप्यु[illegible] उच्चारणार्थत्वेन नतच्छिरस्तो बोध्यः। अभ्यु
पेत्यवादस्य एवेति। दिवउदित्यत्र उदकारांशेन परस्त्रे उदकारस्य श्लेषांशे चेति। नाश्च। इति। न च यङ्लुकि
फलभेदेऽपि तज्ज्ञाप्यसामान्यत्वेन तत्साधारणङ्लुगेव नास्तीति वक्तुं शक्यत्वात्। अं पराणीति। अस्त्वत्र स्वतन्त्रत्व
र्थः। उरत्य वयववाचकं तरेफस्य विशेषणं। तथा च भाग यो रेफस्थान्यादेशभावः। उरेफस्यानित्वे सं पूर्ण
स्थलादेशांस्थानदाह केवल कारेति। पक्षेण कारइति। इतरां तरेफाभावात्स्थानसाम्यादित्यर्थः। न च तम
वर्णो नास्तीति वाच्यम्। व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणभेदात् इति संभवेन तमवर्ण आश्रीयते न तु शास्त्रप्रवृ
त्तिर्बोध्यते। गुणलोपप्रधाननिवृत्त्ययोगात्। आकृतिपक्षे त्वेकमेव लक्षणं सर्वगोपसंहारेण प्रवर्त्ते
त इति कश्चित्तन्मते चरितार्थम्। स्थने न प्रवर्त्ततेति स्यादिति दिक्। एष्य[illegible]ल नेति। इदं तु प्राचां मनुरोधा ग६
त्। लक्ष्यमुक्तमीति। मड्डुकः हर्यनुभवः। रेफस्येति। अनचि चेति प्राप्तं। अदोषइति। अन्यथा तद्विषय
लक्षणस्य तस्य वृत्तेर्वैयर्थ्यापत्तिरिति भावः। विरहेति। अन्यथा तस्यवैयर्थ्यापत्तेर्विपरीतं नियम
बाधः स्यादिति भावः। इकेति। इकोयणित्यादेर्व्यक्तिपक्षाश्रयणे पाशत्वस्यात[illegible] एवेत्यादि। उपधा
नीयोपधेति। पकारस्योच्चारणार्थ इति भावः। असिद्धत्वादिति। यथोद्देशे इदं। अकुवेति। इदमुपलक्षणं
अपदान्तविषये चेत्यपि बोध्यम्। अत एव ढे जैः छि पि संयोगान्तलोपे भुदिति। अत एव पक्षयोर्न फल

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घ्नुर वः५ लेरनुत्र

वि॰म॰ मेदः कथं दकारेति। यदि तु निपातनात् कूलं जग्धित्वेनानन्तरं तमोपि वृकारो भवतीति धित्वायतेतदा
न कश्चिद्दोष इति ध्येयं। दुर्लभेति। चिंत्यमेतत्। सुनो नस्मादिति। दोषयत्वेनैतत्प्रयोजनं। अप्रत्ययेति।
८ विशिष्टस्य प्रत्ययत्वे संभवति प्रत्याहारग्रहणं नेत्यर्थः। तोपकादिति। अन्यथा आस्तुरित्यादावङ्ता
देन गुणसिद्धोत दैयर्थ्यं स्पष्टमेव। सूत्रद्वयमिति। अङ्गेत्यत्र विशिष्टस्य प्रत्याहारग्रहणस्य बहुवचनेन स
चवैयर्थ्यापत्तिरिति भावः। न कुर्यादिति। एतेन ऋकारान्तानामधातुसंभवत्वेऽपास्तं। आस्थानादि
ति। घञादेनन्तरस्य तत्त्वो घञन्तोवेति संशयः। घञाद्यग्रहणमिति सिद्धान्तः। अंकणादसाहचर्यात्प्रकृ
तित्वेनाभ्यर्हितत्वयादीधीवेवीटामिति वत्सर्वं निपातेकर्तव्ये परस्मिपातकरणञ्च नञ्चत्वस्य ग्रहण
मिति चिंत्यमेतत्। अविधेयादिति। उभयोरपरत्वेन विनिगमनाविरहः। सेरीति। बहिरंगत्वेन यणोसि
द्धत्वेपि यथोद्देशपक्षेणयं ग्रंथः। अल्ग्रहणस्येति। धातुग्रहणस्य ज्ञापकतास्वंडनपरभाष्यप्रामा
व ण्येनाल्ग्रहणस्य तत्परं सामान्येनानभिधानात् कार्येणलोदित्याश्रितेश्चिंत्यमेतत्। सो स्यादिरिति।
अकारस्यानुबंधत्वेन लोपस्य चाभावान्तस्य संनिधाविदसंज्ञायामेतत्तदो रिति सलोपः स्यादिति भावः।
गुणानामिति। तथा चानुनासिकस्य हल्त्वेपि निरनुनासिकस्य तदभावःभेदकत्वेनेति। ननु मांसस्य राम:
यस्वेति प्रयोगेऽनुनासिक इत्यनुनासिकत्वेऽनुस्वारः स्यादिति दोषस्य भेदपक्षेपि सत्वाच्चिंत्यमेतत्। ८
॥ ॥इति श्रीकौस्तुभविषमव्याख्यायां सप्तमे पादे द्वितीयमाह्निकं॥ ॥नत्वन्यपीति। अन्यथा निरवका

त्रा२ ह५ सिद्ध एवेति भावः३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥नत्वन्यथेति अन्यथा
निरर्थका

शात्मूर्धन्यशब्दविषयकां नोदात्तत्वविकल्पप्रयुक्तपाक्षिकपूर्वपदप्रकृतिस्वर एव चित्स्वरं बाधेतेति भा
वः। लभ्यत इति। एवं च समासान्तपक्षेऽपि छिन्निष्यामि निञ्नोदात्तत्वविकल्पो भवत्येव। समासान्ता
नां समासावयवत्वांगीकारेण मूर्ध नित्यस्यान्तरपदत्वात्। उत्तरपदावयवत्वपक्षे तु मूर्द्धन् शब्दा
न्त बहुव्रीहे● रित्यर्थेऽपि न दोष इत्याहुः। ध्वनितं चेदं षष्ठिभाष्ये। पूर्वपक्षेति। कारीषगंध्या
पतिकुलमित्यादौ संप्रसारणापादनं हि तत्र पूर्वपक्षे कृतम्। हास्तिशीर्ष्येति। हस्तिशिरसोऽप
त्यं बाह्वादित्वादिञ्। आविशीर्ष इति वार्त्तिकेन शी[illegible]देशः इञः ष्यङ् चाप्। सुप●ठत्वाच्चेति।
पूर्वोत्तरसाहचर्येण विभक्तिनिमित्तकेदन्त एव ग्रहणात्। अत एव लच्छास्त्रेऽपि न दत्तशब्दस्य पू
र्वनिपातः। एवं च तत्साहचर्यात्वादपि समासान्तएव नेत्तु पादयतेः क्विपि निष्पन्न इत्याहुः। एते
न द्विदंत इति बहुव्रीहौ वयोवाचकत्वाभावेदत्रादेशाभावात् शासादौ च हन्निति दत्रादेशा
प्रवृत्तेर्बहुव्रीहिग्रहणं मा बधकमिति पराक्तं। बहिर्भूतशास्त्रनिमित्तकत्वे स्वरेऽसिद्ध
त्वाच्चेत्याहुः। अवृत्या वेति। पत्युनौ वृत्तिर्युक्तानि न्यक्तरूपोपकारभावादिति। तत्र। इ
ण्यण इति सूत्रे को छलू भ एव मीमांसकमर्यादायां दूषितत्वात्। ननु वोः कु मिति। असाधु
शब्दोच्चारणे पाति नरमिन्द्रपतापत्यात उक्तपदानां साधुत्वं धि चारयति। पत्तुसाधुत्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कः

(१ संज्ञापक्षे सर्वेषामर्थवाचकाइतिपक्षे वृद्धिशब्दस्यानेकार्थत्वादादैचोर्धियात्वात्तथा च नैयायिकाः त्रिविधा शक्तिः इत्याहुः)

द्विर

वि॰म॰ स्थानस्पर्शाद्यर्थयोधेंकारत्वैत्वादिति तन्त्राकूत्वाविति सञ्ज्ञेकोस्तु भेदस्य यिष्यते। आद्यपक्षे

८ तेति॰ तीये पक्षे तु वृद्धित्वजातिर्वोधार्थमेवस्त्रंकार्यमिति भावः। नियमार्थमिति।

हरदत्तस्तु वृद्धिशब्दाभावे क्लिन्नेतः। अमेदोपचारान्तु वृद्धियत्तेर्घादैच्सु वृत्तिः। अतए

वसामानाधिकरण्यं॰ लक्षणये वसिद्धं द्वितीये पक्षे पि नियमार्थं॰ वृद्धियुक्ते दीर्घकारा

दीनां ग्रहणंमाभूदितीति॰ ततु अदेङ् गुणोङ् त्पाद्यावसंभवाच्चिन्त्य। अनेकस्मिन्निति॰ ए

काशक्तिरित्यर्थः। इदं च संज्ञासूत्रस्यैतद्यः सारकमिति भाष्यविरुद्धमित्याहुः। संकोचइति॰

अतएव वृद्धिरादैजिति सामानाधिकरण्यम्। पक्षान्तरेतु ऐदैशा एवादैच्सु वृत्तिः स्यात्ततस्त्वेव

संज्ञात्वेन विनियोगकाल इति सामानाधिकरण्यमनुपपन्नमेव स्यादिति दिक्। विरहइति।

पिंडविशेषसंकेतितस्य कूचीमचीत्यादीनामिव केवलपदस्त्रीकेरीत्यासाधुत्वमस्त्येवेति रामः

भावः। प्रसिद्धापीति। कचिदेशक्तिरन्यत्रलक्षणेति पक्षे इ[illegible]त्यर्थः। तदभाविताना

५४ भवेति। न चानज्ञापितानामेतिपक्षोपि किं न दर्शितः। कल्पकाभावात्। आवृत्तिसामगे। विशे ८

५३ षपक्षस्येव संभवात्। नापि टिघुभादयत्तज्ञापितानां भवद्वितिदिक्। तत्त्वोपइति। लुगित्यर्थः। य

नुके यटः। पूर्वपदेनाक्षेपात् उत्तरपदेलब्धे उत्तरपदग्रहणंअधिकारलक्षकं [illegible] वृद्धिरूपोत्तर

(अवच्छेदकभेदे॰ निरूपकभेदे॰ निरूपकं अर्थः॥ अर्थनिरूपिता पदनिष्ठा शक्तिः औपाधिको भेदः॥ इन्द्राद्यर्थभेदेन

इत्यादौ शक्तिभेदः॥ उपाधिः॥ अर्थः॥ उपाधिस्थितिः॥ अविद्यास्थितिः॥ अविद्योपहितचैतन्यं जीवः॥ उपजेयेपि॰ पारमा

र्थिकस्वरूपेण सकृत्त्वयभेदकल्पितएवशक्तिभेदः॰=)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदासंभवाद्बहुव्रीहिमङ्गीकृत्यैते वृद्धिशब्दस्य नग्रहणे। अत एव संज्ञेति निषेधादिति। तन्न। अव
तीति औः सर्वस्यौः सर्वौ इत्यत्र वृद्धिरूपोत्तरपदसंभवलक्षणायां नोभावात्। नचैकादेशे ऐव गी
भावः। न च स्थानिवद्भावः अपूर्वविधित्वादिति वाच्यं। नेदं स्य परस्येति निषेधेन पूर्वोत्तरसंबं
धिकार्यस्यैकादेशात्प्राक् प्रवृत्तिज्ञापनात्। तच्चानेन सर्वशब्दान्तोदात्तत्वे शेषनिघाते नोकार
दीनामनुदात्तत्वे एकादेशस्य स्वरितो वानुदात्ते पदादाविति पाक्षिकः स्वरितः स्यात्। नचैवमपि
सर्वद्भाविति वर्णव्यत्यय उत्तरपदग्रहणं व्यर्थमिति केयदाशयः। स्थानिवद्भावस्य दुर्वारत्वादतस्तु
पेक्ष्याह। स्वयं तदिति। कृत्स्नाया इति। कार्त्स्न्यं च प्रतिपत्तिकालिकं ग्राह्यं। न प्रयोगसमवायीति
पारिषद्याभावेन दोषः। आरब्धौ प्रमाणं च निमित्तग्रहणेन व। अन्यथा वृद्धिरूपतद्धितासंभ
वेन वृद्धिनिमित्तग्रहणं सिद्धौ किं तेन। न च दण्ड्या ब्रात्रिहरणमस्याः यां दस्ये दण्डाहत्या ऽ।९
देवृद्धिस्त्वस्तद्धितः सम्भवतीति वाच्यं। अविकार इति पर्युदासेन तस्याग्रहणात्। नहि लिका
रार्थवृद्धिरूपतद्धितोऽस्ति। एतेन निमित्तग्रहणसामर्थ्याद्वृद्धेर्निमित्तं यस्मिन्निति अधिकरणे बहु
व्रीह्याश्रयणमिति भाष्याद्युक्तमपास्तं। यः कृत्स्नाया वृद्धेरिति भाष्यं। बहुवचनात समासपरत
याव्याचष्टे। केचित्त्विति। वृद्धीनामिति षष्ठ्यर्थः। स्वरूपयोग्यत्वरूपहेतुत्वम्। तद्धयन्निमित्तं पारिशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कः
खः

वि·म· षात्क लोपविहितं· तत्र सामर्थ्याद्यातं विप्रत्ययेवेति भाष्याशयमाहुः। इति पक्षेयोग्यमिति। अत्र पक्षेऽस्म
१० च्छास्त्रे वृद्धिशब्देनादैचो बोध्या इत्यर्थः। कार्यकालेति· अत्र पक्षेऽमजे वृद्धिरादैचो भवन्तीत्यर्थः। आ
दिरन्त्येनेति· अत्र यद्यपि संज्ञी नश्रुतः किन्त्वाक्षिप्तः। तथापि शब्दाध्याहारवादे ताद्दशशब्देन तथै
४५ वानुपूर्वीकल्पनमिति भावः। अर्थाध्याहारे तु चिन्त्यमत्रानुपूर्वीकल्पनं। भाविसंज्ञेति। इग्यणाद्युक्त्या
- दोसामर्थ्यात्तत्कल्पनमिति भावः। प्रत्येकमिति। द्वन्द्वनिर्देशादिति भावः। प्रत्येकं वाक्यपरिसमा
प्तिश्च वा कार्यक्रियायां वा कोपाते घटे कैकस्मिन्नर्थे प्रवृत्तिः। अन्यथैकस्मिंस्तु पारूढनाना क·६
पदजनितैकस्मृतिविषयपोरादैचोस्तत्रैव प्रत्येकं संज्ञि संबंधकल्पनापेक्षयासंभूयोप
स्थितेः सत्त्वेन समुदितस्यैव स्यादित्याहुः। दर्शनाच्चेति। नदुक्तं· अन्नादनादिरूपांच सर्वेष्वपि
कल्लां भुजिं। प्रत्येकं प्रतिपद्यं तेन तु नाद्यक्रियामेवेति। नमाप्नोत्येवेति। एवं चात्र पक्षे तपरकरणं
स्पष्टार्थमेवेति बोध्यं। वृद्ध्यादीनामपीति। म्जेर्वृद्धिरित्यादावैचसंज्ञासंज्ञिभावगमइत्यर्थः। प धा४
दोपस्थापकमिति। यत्र वृद्धिशब्दस्तत्रादैच उपतिष्ठेते इति वाक्यार्थः। अस्मिन्पक्षे वृद्धिशब्दस्य प्रा राम:१
धान्यमेव युक्तं। प्रदेशेत्वादैचूपदकल्पनयैव बोधः· कल्प्यमानपदस्य चोपस्थापकसमानविभ १०
क्तिकत्वं· अत एवोत्तरपदवृद्धावित्यत्र न दोषः। इको गुणवृद्धी। न चैवमायादेशोऽपीति· ऐकारस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामर्थ्यप्रापातत्वाधकवचनस्याभावमात्रकल्पनमिति न किंचिदपूर्वं कल्प्यमिति दिक्. गुणवाधेपीति.
यत्तु आकारान्ता नामेजन्ताप्रकृतय ५

विकृतरूपश्रवणार्थत्वादिति भावः। परिभाषात्वेति। वृत्रहभ्यामित्यादौ पदत्वद्वारा भ्यां सन्निपा
तकृतो न लोपः। ह्रस्ववर्णावयवत्वेन अवधायकत्वात् नद्विघातकं तुकं न प्रवर्तयेदेवेति कृति
तुक्ग्रहणं तदनित्यत्वे ज्ञापकं। आदेच इत्यात्वमपीति। एजुपदेशस्याविकृतरूपश्रवणार्थत्वा
दिति भावः। आत्वाबाधेति. यत्तु सौत्रत्वादेव प्रयोगोपपत्तौ आत्वाऽबाधकल्पनं प्रमाणाभाव
इति तन्न। आनुमानिकवचनकल्पने मानाभावात्. मानं त्वेजुपदेश इति वार्तिके तत्पुत्तरत्रैज म५
ग्रहणस्य नप्रयोजनं. वृद्धौ कृतायां पुनः प्रसंगविज्ञानेन ▪ तु गुणे कृत एवात्वेन भाव्यमित्येङ्ग्रह
णेन सिद्धेरिति. तन्न. गुणस्याप्यस्यैव परत्वान्नित्यत्वेन वाधे तु पुनःप्रसंगविज्ञानस्य वचनार्हं
ता. इदं तु चिंत्यं. इको गुणवृद्धी इति परिभाषाभावे ह्ययं विचारः. तत्र हि ध्मा गुणवाधो न परत्वेन
। गुणस्यैव परत्वात्. नापि नित्यत्वेन. इक्परिभाषाभावेन वृद्धौ कृतायां गुणस्यापि प्रवृत्त्यात्स्या
पि नित्यत्वात्. शब्दांतरप्राप्त्यानित्यत्वमप्युभयोः समं. उभयोः प्रकृतिप्रत्ययनिमित्तत्वेन
त्व वहिरंगत्वमपि समम्. वृद्धेरन्यत्र चारितार्थ्यादपवादापवादत्वमपि न. एवं चैतद्विषये परत्वा
द्गुणे कृते वृद्धेः प्राप्तत्वेन वार्तिकमते एङ्ग्रहणं कर्तुं युक्तमेव. इक्का गुणवाधे इत्युक्तिस्तु
चिंत्यैवेति दिक्. वृध्या स्वस्याव्यभावेन गुणस्य वाधे श्रवणे इति वार्थ इत्यप्याहुः. वार्तिकवि
रोधाच्चेति. आकारेपि इत एव गुणाभावसिद्धौ न दृष्टो ज्ञापकवर्णनले.शो न कार्यः स्यादिति

नितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग:

वि・प्र・ त्वमेतत्・सानुनासिक ओकारः स्यादिति・तथा सति गो पयसो रित्यादिनिर्देशविरोध इति भावः॥ उ
पपत्तेरिति। त्यदादीनामद्द्रत्यत्र तपरत्वाभावात्तपरसूत्राप्रवृत्तेर्भाष्यमाणत्वेन चाणुदित्सूत्रा
११ प्रवृत्तेर्निरनुनासिकोच्चारणाच्च निरनुनासिकतायुक्ता・प्रकृते विदिति तपरत्वात् तपरसूत्रप्र
वृत्तेरान्तरतम्यादनुनासिक एव युक्त इति तन्न・अर्धमात्रा लाघवायच्छन्द आमिइत्येव सूत्रं का
र्यमिति तदाशयात्・इह नित्ये नपुंसकनिर्देशः। तेन विभक्तिप्रबलं नापाद्यं・वस्तुतस्तु गुणानां
ममेदकत्वेपि न दोषः। सन्यत इति सूत्रे सनि इकोत इति प्रश्ने चणपुरुस्येव विधानादिति दिक्・दिति
ति। यनुसन्वदितदेशादङ्गेनेति दीर्घः स्यादिति・तन्न・सामान्यातिदेशविशेषानतिदेश्योत्・तस्य
फलादिसन्निमित्तत्वात्・न भविष्यतीति・यत्तु अल्लोपस्य परिभाषया परत्वात्स्थानेन्तरतम परिभा
धा・ षा बाधेति・तन्न・कार्यकालपक्षे परत्वस्यैवासत्वात्・नेत्त्सादोसमावेशसंभवेन विरोधा
भावाच्चेत्याहुः। लाभाद्येति・न मयूरस्तीनानेकविधां तर्ये संभवेत ग्रहणस्य पुरुतवो घनादिति
भावः। रुदघसीति・प्रमाणतः आन्तर्याभावे न अकारे गुणप्राप्तेः अकारस्य गुणसंज्ञात्वतो गुणाद
त्वादेचरितार्थेति भावः। विध निर्विषयतेति・स्थानं नाआन्तर्याभावेनाकारस्याप्यप्राप्तेरिति भा रामः
वः। इक इति विशेषणाभावे काम यत इत्यादेणिङो ङित्वे हृद्धिनिषेधः। णिङो णित्वं तु लेरनिटीत्यादि वि ११
शेषणार्थं・ननु तथापि धातुस्मापारभ्य यणम् फलं नत्राह・अन्यथेति・च्यादि वृद्धिस्यादिति・किति चेति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाऽयनादेश्चरितार्थे· अप्रवर्त्तकत्वादिति· ह्रस्वापयती त्यत्राकारस्य तु न गुणः। पुंकि विवक्षितेत्यस्य गु
णहृत्यत्र्वात्· पकारस्य तु न· अंतरंगत्वाल्लोपप्रवृत्तेः। स्थानप्रयत्नाभ्यामंतरतमे चारितार्थ्या ञ्च· वेले
ल्लोपे रित्यादिनिर्देशादेव वल्लोपे यती त्यादि सिद्धिर्यो [illegible] येत्याहुः। ह्रस्वापयती त्याकारस्य गुणोऽतउप
धाया इति वृध्यापि सिद्धिरित्याहुः। तपरकरणं नानित्यत्वेति। अस्य आतामिति स्थिते विप्रतिषेधेआभी नै ४
८५ यासिद्धत्वाभावेन परत्वादल्लोपेन सर्वमीयत्वे नास्ति इत्वात्तु नः प्रसंग इति त्वानादिकृते निमित्तभक्ता याह
द्विविकारान्यानुपपत्ती ऐक्याभावात्· पूर्वप्रवृत्ते रसिद्धत्वाच्च। लक्ष्ये लक्षणस्यायोगप्रवृत्त्या चप्राप्तलो
पवारणार्थं तपरकरणमान्तेसिद्धत्वे यथैसत्तदनित्यत्वे ज्ञापकमिति भावः। न चैवं पितेर्वै यर्थ्य· असि ह्म २
द्धत्वस्यानित्यत्वादाट एंधाम्नाप्तेरितिवाच्यं· आघनित्यत्वे ना प्रवृत्तेमानाभावात्· अस्य साहचर्येणाटो
लोपो [illegible] नेति आदिनां तु चिंसमेनज्ञापकं· भाष्यादिविरोधेन नात्र साहचर्याश्रयणमित्ति तत्वं·
समासइति· यणादीति लुप्तपंचमीकं· भिन्नं पदं वकुं युकं· तथा स सुत्त रसत्रे पूर्व शब्देनान्वयः सु
करो भवति· यदि तु पूर्वत्वस्या व्याकांक्षायां परत्वेऽवधित्वेन स्थितत्वादुपस्थितत्वाच्च तस्ये वाव
धित्वं न त्वेकदेशस्यानुवृत्ति रिसुच्यते· तदा समासे पि न क्षतिः। न च ह्रस्व शब्द ह्रस्वपादस्य लो
पापत्तिः। स्थूलहृत्रादि साहचर्यतत्तु पांताद्य [illegible] लादेः परस्येव लोपान्नदोष इत्याहुः। अनेकाच इति·
आजादिसहितानेकाच इत्यर्थः। असिद्धत्वेति· तथा चोकारस्यात्वाभाव इति भावः। सेणाद्देशा चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि.म. ऽथक्रिवंतेऽतिप्रसंगस्यानवस्थत्वादाह । कथंचिदिति । गुणावादेशयोरिति । न च गुणे कृतेऽवादेशं वा
१२ धित्वा वाणि दांगमिति न्यायेन वृद्ध्यावावादेशोऽस्त्वीत्यादेः सिद्धो वकारश्रवणे प्रयत्नमिति वा
च्यम् । तत्रैव वृद्धिर्वारणायैकग्रहणस्यावश्यकत्वा [redacted] ऽरार्थमपि ग्रहणस्यानुपयोजनमिति पक्ष
स्यैवासंभवेन वाणि दांगमित्येतदनाश्रित्यैव पूर्वपक्षप्रवृत्तेर्योग्यत्वात् । ओतयीदिति । नोनय
तीति चङ् निषेधः । ननु गुणे कृते वृद्धिप्रसक्तिरितोर्थस्य तत्राह । सत्यपीति । अन्तर्येति । यद्यपि
श्रमः कर्त्रर्थसार्वधातुकपरत्वं विच्छिद्यते । तथापि सामर्थ्याद्व्यवधाने संभवमात्रेण सिद्धो शा
स्त्रबाधकल्पने मानाभावात् । एवमकचो कार्यत्वेपि दोषाभावः लक्षणाविधिवत्को दुर्वार इति भाव
ः । अनुवृत्ताभ्यामिति । अनुवृत्तगुणवृद्धिग्रहणयोरसमस्तयोरेकवचनांतयोर्द्विवचनांतसम वृ८
स्ता विभागापन्नवर्ति पदार्थमतगुणवृद्धिविशेषणत्वासंभवाद्विंत्यो यमपक्षः । नहि संभवति दे
वदत्तयज्ञदत्तौ दंडी कुंडलीति । संभवादिति । पपिमपिग्रहणमनुत्तरार्थमेव स्यात् । पूर्वत्रापा
ठक्रमविभक्त्यनुच्चारणलाघवानुरोधेनेति भावः । उपक्षयादिति । इदमुपलक्षणं । पथीयतेः क्वि
पि वारितार्थेन येनना व्यवधानन्यायाश्रयणमशक्यं कर्तुमिति स्पष्टं । वा बेति । यत्तु भने नाकार राम:९
विकल्पविधाने हस्वं सिध्यतीति तन्न तत्र दीर्घग्रहणानुवृत्त्यनापत्तेः । दिगिति । न च अचि १२
धोऽस्तु इति स्थानिनिर्देशो लापक इति वाच्यं । उकारानुवृत्त्या तस्याचार्थवत्त्वात् । अनंतविका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेइति भाष्यात्तु नास्त्येव । पठ्यते । क्ङिति अल्व्यावृत्त्यर्थमावश्यकत्वाच्चेत्याहुः । व्याख्यानादिति । आ
कारादिषाङे नयत्र वृद्ध्यादयो विधीयन्ते इति विपरीतोऽर्थः स्यान्न । एवं सूत्रे केऽपि क्ङिति गुणशब्दयोः शब्द
परत्वस्य लक्ष्यत्वादित्याहुः । सत्यां क्ङितेनेति । पठ्यते । क्ङिति व्यावृत्त्यर्थमिक्हलन्तस्य चारितार्थ्ये
नेदं ज्ञापकं चिन्त्यं । इक इग्घते ष्मिन्निति व्युत्पत्त्या सूत्रपरत्वसंभवादाह । नातीचेति । एवमेवेति ।
विशेषणविशेष्यभावे कामचारादिति भावः । क्नोः किलादिति । क्नोः ककारः अवर्णोपर्यवस्या
दतोऽसद्विदालिन्दः क्नासनोः स्दिपिदिमुषीति विधीयमानं किलं ज्ञापकं बोध्यं । ईहितेत्यत्रा
पीति । पुगन्तेति सूत्रं तु संत्यस्य हलो कि अर्थं स्यात् । पुकि अन्तग्रहणार्थपक्षे नियमत्वेपि अनेनैनि
नुरिति दोषो दुर्वार इति भावः । नहीति । अंगस्य यो ह्रस्वस्तस्य गुण इति वैयधिकरण्यमित्या
शयः । ह्रस्वेति । संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वादित्याशयः । अग्निचि
त इत्यत्रापि प्राप्नोतीति भाष्यानुपपत्तिमाशंक्याह । यद्यपीति । अयं भावः । न ह्यनियम इति श्रु
तिः स्मृतिर्वा । किंतु परिभाषा लिंगवती फलवती चेति नियमः फलं चेतरव्यावृत्तिरित्यदितर
संग्रहोपि वक्तुं शक्य इति । यदिहीति । अनंतरस्येति न्यायाश्रयणे नेत्यर्थः । यदि सतीति । तदनाश्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि·म· यत्नेनेत्यर्थः· पिबतेरिति· इदं चोपलक्षणं तस्य कोऽगुण इत्याद्यव्याख्यानेऽतिप्रसंगस्यापन्नं बोध्यं
१३ अंगमेवेति· प्रत्ययस्याङ्गाक्षेपेऽस्ति ताकांक्षात्· मिदेर्गुण इत्यादौ श्तिपो त्यादिभिर्निर्दिष्टाङ्गापे
तायाः परिभाषा अनुग्रहायाङ्गस्य वृश्च विशेषणीयत्वाद्गुणप्रकरणावैरूप्याय चेत्यर्थः।
रामा४ ॥ ॥इति श्रीशब्दकौस्तुभविषमव्याख्यायां प्रथमे पादे तृतीयमाह्निकं॥ ॥न धातुलोप·
ते चार्धधात्विति· अयं च पक्षो यद्विपरिगणनं क्रियते मेघते द्वेषते ऽचापि प्राप्नोतीति ग्रन्थेन
भाष्ये ध्वनितः· अन्यथा क्नोपयतीत्यत्रातिप्रसंगवारणाय ज्ञापकाश्रयणे दोषस्यान्त
दवस्थमेवस्यात्· केयटस्य त्वेतत्पक्षानुपन्यासे न्यूनतैवेति केचित्· विस्मृतमिति· यत्तु
ओमाङोश्चेत्यादिग्रहणेनानाजानंतर्यपरिभाषाया अनित्यत्वज्ञापनेन विरोध इति· तन्न·
तस्यानंतरंगबहिरंगयोरंतरंगं बलीय इत्यर्थज्ञापकतायां तत्पूर्वपरसर्गयोः कार्ययोरा
तरंगता ज्ञापकतायाश्च संप्रसारणाच्चेति सूत्रे उक्तत्वेन तद्व कार्ये मानाभावादित्या राम:
कुः॥ इणः परस्येति· यद्यपीहलोपि तयापि चोपि नत्रान्तर्भूताः संत्येवेति भावः· अच इति षष्ठ्या १३
र्थे निष्ठत्वं· तेनाच् निष्ठमानंतर्यमत्रैवाश्रीयते नत्रैवार्यनिषेधः· तस्मादुत्तरस्येत्यस्य पंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यंतार्थेऽप्यवस्थिते सतीत्यर्थान्न धर्मिग्राहकमानविरोधः ॥ अत एव ग्रामणिकुलमित्यादौ ह्रस्वस्ये
ति तुगसिद्धपरिभाषया वारितः । कृन्मेजन्त इति सूत्रे भाष्ये इत्याहुः ॥ निर्देशादिति । इदं च यलोपा
र्थमावश्यकम् । अन्यथा वर्णमात्राश्रयत्वादंतरंगे लोपे बहिरंगस्य पुको सिद्धत्वात्सन्नस्यात् ।
बाधत इति । तद्बीजं तु अचरितार्थत्वं मानान्तरबोधितप्राबल्यं वा । आद्योदाहरणं । अस्य स्तामिति ।
द्वितीये त्विदं । नधातुलोप इति । अस्य हि निषेधाभ्यवलीयांस इति न्यायेन प्राबल्यं बोधितं । तस्यापि
बीजं तु विध्युन्मूलकत्वमित्याहुः ॥ एतेनापवादोपि यद्यन्यत्र चरितार्थस्तर्ह्यंतरंगेण बाध्यत ए
वेति न्यायविरोधादिदं चिंत्यमित्यपास्तम् । अंतरंगत्वादिति । अनवकाशत्वादेवसिद्धौ चिंत्यमेत
दित्याहुः ॥ साधुरिति । ननु बहुव्रीह्यभावेपि न दोषः । अचः परस्मिन्निति स्थानिव [illegible] दभावा
तिदेशे न निषेधाभावसिद्धिरिति चेन्न । किंच । वेभिदितेति किं यङ्लुगंतं यङंतं वा । नाद्य इत्याह ।
भिदीति । नांत्य इत्याह । यदि त्विति । अवयवलोप इति पूर्वोक्तरीत्या इति भावः ॥ चानुवर्त्येति ।
अलोंत्यपरिभाषया वेति बोध्यं । णिश्रीति । चङि इति । अत्रेदं चिंत्यं । सार्वधातुकयोरिति गुणो
त्त्वं नित्यत्वाच्चङि । द्विर्वचनेचीति निषेधाद्गुवङ्भावे द्वित्वात्परत्वाल्लघूपधगुणोडुवोरिति तन्न
अंतरंगत्वाद्धलस्येव प्रवृत्तेः ॥ ओणेर्ऋदित्करणे नोपधाकार्यस्याद्धित्वात्प्राबल्यबोधने पिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि॰म॰ दोषः॰ ज्ञापकस्य सजातीयापेक्षत्वेनोपधाकार्येस्य यत्र छित्वस्मा न निमित्ततां छित्वा वोङ्
१४ निमित्ततावा नत्रैवप्राप्तस्य बाधनादिति बोध्यं॰ नचानयाशीत्या तासौ नित्यानिट्त्वापेक्षे
त्तिनिषेधेप्राप्ति देशः स्यादिति वाच्यं॰ सर्वे ग्रहणस्यानादिष्टादचः पूर्वत्वस्याशास्त्रीयत्वेप्र
प४ तिदेशाप्रवृत्तिं स्वीकृत्याद्दोषः॰ तदेवध्वनयन्नाह॰ सर्वग्रेति॰ सर्वग्रहणभस्यास्थाने ज्ञाप
काभावादित्यरुचेराह॰ किंचेति॰ विलंबितोपस्थितिकइति॰ संज्ञापूर्वकविधेरनित्यत्वाज्ञगु
णः इत्यपि बोध्यं॰ अङ्सदृशोदृति॰ प्रतिपदोक्तपरिभाषाबलख्याङ्सदृशोऽइत्यर्थः॰ श्रूयमाणेति॰
प्रकृते च श्रूयमाणत्वाभावान्न लोप इति भावः॰ ज्ञापकेनेति॰ य[illegible]त्रा जिसेकत्वविवक्षायां आ
स्वेलब्धे एकग्रहणस्य प्रयोजनं यथेकाच उपदेश इत्यत्र वधादेशस्यादित्यादि तत्रैव निषेध
दिस प्रकृतिरिति ज्ञापनार्थः॰ अतएव भप्रभावो यङ्लुकि भवत्येव॰ अनित्यत्वज्ञापनादित्यपिक
न श्चित्॰ वक्ष्यमाणत्वादिति॰ सूत्रस्याख्यानपक्षेपि विहितविशेषणान्न दोषइति वक्ष्यते॰ ह —
त्रासंभवादिमतेदूषणमाह॰ किंञ्चेति॰ गुणः स्यादिति॰ अस्मद्गुरुचरणास्तु भोरीत्या ष्य ३
प्रत्याख्यानेपि न दोषइति भावः॥ ॥कृति च॥ साक्षादिति॰ साक्षान्निषेध्याक्रियायासंब राम॰ १
ध्येत्य[illegible]न्वयः॰ एतेन स्थानिभूतेकृद्वारेवत्स्य क्रियाविशेषणत्वात्साक्षादित्ययुक्तमित्य १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पाते॰ साक्षान्निषेधान्वयेप्यस्य च साक्षान्निषेधान्वयित्वमाभवति क्रियायेत्यर्थः॰ इदं तु गुणीभूत
क्रियया संबध्यत इत्याह॰ इहेतिति॰ क्रियान्वयिन्येवेति॰ यथा इको यणीत्यादौ॰ यद्यपि क्रियान्व
यी यण् तथापि तस्यासिद्धत्वेनाचूपरत्वासंभवेन सामर्थ्यान्न दन्वयी कृ गृह्यत इति बोध्यं॰ न
च यस्य जातस्याचूपरत्वं भावीति भाविबुद्ध्याश्रयणेन साक्षात्क्रियान्वयिविशेषणत्वमेवा
स्त्विति वाच्यं॰ एवं त्वेधतीत्यादावसंभवात्॰ इदं तु क्रियान्वयिन इति॰ प्रधानक्रियान्वयि
गौणक्रियाया इत्यर्थः॰ गुणक्रियाया इति॰ प्रधाननिषेधक्रियाया इत्यर्थः। अतो त्वेति॰
प्रधानक्रियान्वयिनि चरितार्थत्वादिति भावः। संबध्यत इति॰ न चैवं प्रधानान्वयके च बोधि
घेतेति वाच्यं। यत्र प्रधानान्वये यत्फलं तदपेक्षयाऽधिकं यत्र फलं गुणान्वये॰ तस्य चेष्टत्वे
इष्टत्वं प्रमाणं तत्रैतन्न्यायोपगीकारात्॰ न देतदुक्तं महत्त्विति॰ प्रकृते च तादृशत्वस्य फूमेवे
त्याहुः। न तु परकीयेति॰ वाक्यद्वयस्यैकवाक्यतानापत्तेरिति भावः। भाष्य एवेति॰ धातोः पर
स्मैपदानां णलिति सूत्रयोः। मुख्यताभावेति॰ विशिष्टं तु नातिदृष्टं॰ अशास्त्रीयत्वादिति भावः॰
चरितार्थत्वादिति॰ एतेन सेहिऽचेति सुवचमित्यपास्तम्॰ अएतेनैव नातङ्॰ नुदात्तइति सिद्धांत
ः। अत एव तु ह्योस्तादशिपीति भाष्येन्यासान्तरं संगच्छत इत्याहुः। वस्तुतस्तु इदं चिंत्यं॰ हलः श्नः

कृः

वि॰प्र॰ तिसूत्रे प्रा न च [illegible] स्यानुबंधकार्ये स्थानिवत्त्वज्ञापकतामुक्त्वा तत्फलत्वेनापि तद्ग्रहणं
न कर्त्तव्यं भवतीति लाघवमित्युक्तं भाष्यकृतां संगच्छते। भाष्ये त्वसंयोगादित्यत्रानुवृत्ति
१५ व्याख्यातं। ज्ञाप्यते इति। यासुटो ङित्करणमप्येवमेव बोध्यं। एवं च भाष्योक्तं ङिच्चपि [illegible] ल्ले
न४ [illegible] त्यादिवचनं कार्यमिति भा[illegible]वः। अस्मिंश्च पक्षे स्तुयाच्चिनुयुरित्यादौ पूर्वोक्तरीतिरे
व शरणमिति बोध्यं। ङीप्नोति। इदं दूषणं यथाश्रुतवार्त्तिकमतेपि बोध्यं। दीधीवेवीटां प्र
त्याख्यानमिति। ननु तत्राप्यकृतो रादेशोपि स्थानिवत्त्वं ओ छ्वांगीकृत्य चङ्परनिर्ह्रासे
स्थानिवत्त्वं निषेधं च मालोपश्च [illegible] आमाम वदित्यपि भावरूपकं त्वानंगीकृत्य तेनैव दू
षणाभावसिद्धेरग्लोपिग्रहणमितरुद्धं स्थानिवद्भावाभावस्य ज्ञापकमित्युक्त्वा यद्येवं त
र्हि आदीधयतेरादीधकः आवेवयतेरावेव[illegible]कः यीवर्णयोरिति लोपो न स्यात्त्वा
शं कथं वर्णग्रहणसामर्थ्याद्भविष्यतीत्युक्तं भाष्ये वर्णग्रहणसामर्थ्याद्भूतपूर्वगति रा॰म॰
राश्रीयते। अंतरंगत्वाच्चुलोपसिद्धे वर्णग्रहणं शक्यमकर्तुमिति कैयट०। तत्र भूतपूर्व १५
गत्याश्रयणेऽचः परस्मिन्निति सूत्र[illegible]स्थ आदीध्ये भाष्यप्रयोगोऽनुपपन्नः स्यात्। अंतरंगत्वे
न णिलोपात्पूर्वं यीवर्णयोरित्यस्य प्रवृत्तिरस्त्वेन फलाभावाच्च। न चाकृतव्यूहपरिभाषया नेति वाच्यं।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थानिवद्भावस्य दुर्वारत्वेन निमित्तविनाशाभावात्। न चाग्लोपि ग्रहणसामर्थ्यादीदृशे विषये न स्था
निवत्त्वमिति वाच्यं। अनग्लोपेऽग्लोपेपि अकृत्वा देशो अजादेशो नेत्यचः परस्मिन्नित्यत्र निर्णीतत्वात्।
तस्माद्ग्लोपग्रहणं न्यायप्राप्तसौऽर्थानुवादकमित्याशय एव भाष्यस्येत्यभिप्रेत्योक्तं। भाष्येप्रमाणत्वात्तमिति। अ
न्यथेति। कार्यि॰णो निमित्तत्वेनाश्रयणे। सम्बद्धो रितिसप्तम्याश्रयणे चेत्सर्वः। आदिनाऽछिदिधिपती त्यादिकं।
अ■त्र गुणनिषेधे धिस्रशब्दस्य द्वित्वे अकारस्यानुपधात्वाद्गुणो न स्यादिति बोध्यं। स्यादिति। सप्तम्। पक्षे तु स
शब्दस्येव द्वित्वं स्यान्न स्यादेवोभयथापि प्रकृतरूपासिद्धिः स्पष्टैवेति दिक्। तद्भावभावितेति। षष्ठ्यं तत्पक्षे नि
मित्तत्वाभावेन स्थानिवत्त्वाप्रसक्तौ हीदमुक्तम्। कार्यमनुभवन्निति। अर्थाभावे संगतं स्यादितीदमेव भाष्य
मत्रार्थे प्रमाणं। ज्ञापकादिति। न चैवं समानाजैत्यत्र तस्य चारितार्थ्ये तावन्मात्रार्थत्वे वृद्धाधित्येव वदेत्। न च
सिचि वृद्धावपि सिद्धत्वापत्तिः। प्रत्ययलक्षणेन पुनर्वृद्ध्यावकृतव्यूहपादिमोपधाऽस्वेच्छा मित्साध सिद्ध्याप्र
त्यभावात्। वस्तुतो ह्रस्वादङ्गादित्यत्राङ्गग्रहणेनास्याङ्गत्वाद्वाणां दाङ्ग मित्येव समानाजैत्यस्य सिद्धिरिति
भावः। सिद्धावपीति। उञ्छिणिलोपस्य स्थानिवत्त्वाभावेनेत्यर्थः। विनेति। अल्लोपस्याणि निमित्तत्वा
त्। रूपं भवतीति। अपरविधाविति तु वक्तव्यमिति त्वचः परस्मिन्नित्यत्र सवार्तिकं सिद्धान्ते नच्छि
तमिति भावः। हलोऽनन्तराः। छिद्वाचीति। हल्त्वाकान्तवर्णस्वरूपः कालः सामर्थ्यात्। अयर्ह स्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जः

सि.म. ध्वंते फलाभावादित्याहुः। समुदाये इति। यत्तु ह लोऽच्हल्लभ्येतिसहविवक्षायामेकशेषविधानेन साहित्य
प्रतीतेरेवसमुदायेसंयोगसंज्ञासिद्धिरिति। तन्न। एकत्रान्वयमात्रेणसाहित्योपपत्तेस्तत्वदुकार्ये
१६ मानाभावात्। पंचानामेकत्रसत्वेऽपि पञ्चेत्यापत्तेरित्याहुः। सिध्यतीति। अतएवेन्थिमवतिभ्यां चेतिदृष्टे
:कित्वविधानं सार्थकं। अन्यथा ऽसंयोगादिति सिद्धेः किं तेन। मुखनासिका। करणे इति। अधिकरण
त्युटि भाष्यस्वरसः। प्रासादवासिन्यायात्। नपुंसकमिति। स्त्रीत्वे हि वचनिकइतिस्यात्। ततो मुख
नासिकेति। मध्यमपदलोपी समासः। इक्षासनयोरितिस्त्रस्य भाष्यप्रामाण्यादेकवद्भावस्यानि
त्यत्वेन द्वंद्वोपि साधुरित्याहुः। नासिकामिति। तथा च केवल नासिकापदेन तत्र हलाः संभवत्
सत्वेन ह्रस्वोपि साधुरित्याहुः। नासिक्यमिति। तथा च केवल नासिक्यपदेन नन्निषेधाभावात्
भावः। प्रयुक्त इति। किं चैवं निषेधोऽपार्थः। मकारस्य कवर्गादौ तीव्रस्य सत्वेन निषेधाभावात्
एतेन नस्पर्शस्योष्मप्रकृतेः प्रतीयाघमापत्तिभितिपाठस्य सत्तान्वेदं सावकमिवयपास्तं।
भाष्ये तथापाठेपि द्वन्द्वतोऽपेवपाठात्। नकारद्वयेनि। अनचि चेति द्वित्वे नेति भावः। नचय
मानुनासिकारेफिरपाठ न दत्वे नाचिनेति निषेधः स्यात् इति वाच्यं। उक्तशिक्षावचनसाम राम:
र्थ्यनैव तत्प्रवृत्तेः। चांद्रसत्याच्चेत्याहुः। अप्राप्तिपत्तिरिति। अन्वर्थत्वेन नकारादिरित्यपत्ते २६
श्चितत्समेतत्। लोप इति। अनुनासिकोपदेशेति सूत्रे लोपि। पक्षेति। व नस्यासिद्धत्वात् हलस्य

वे·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

त्वं। तुल्यास्यप्रयत्नं। तुल्यौ स्थाने त्रिस्थानसाम्यमौपाधिकं भेदमादाय। पश्चान्मूर्द्धिस
तिहतइति। आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहंति स प्रेरयति
मारुतं। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते इति शिक्षाविरोधा
च्चिंत्यमेतत्. वर्णशब्देनात्र ध्वनिरुच्यते. अत एव पूर्वं वर्णानामिति पक्षेऽरुचिमनीसि
निधायतदभिव्यंजकध्वनेर्वेत्युक्तं। अनुप्रदानादीति। विवृतएव तस्मिन्नपि परिवर्तमा
नाः श्वासा भवंतीति तदनुप्रदानमित्याचक्षते। नाकूलोः शकारप्रतिषेधइति। द्विवचना
तेन समासः। भेदाधिष्ठानत्वात्सवर्णसंज्ञायां नेनिष्पन्नमिति। न लत्पसंस्कारे पयो
गी त्पर्यः। लक्ष्यसंस्कारार्थं हि सवर्णसंज्ञा स्याप वादविषयं पर्यालोचतीति भावइत्या
दुः। अनुपपत्तिरिति। साधुत्वज्ञानाभावादिति भावः। हशिचेत्युत्वं स्यादिति। पूर्वसूत्रेती
तितपरकरणसामर्थ्येनाप्यस्य सुवारत्वाच्चिंत्यमेतत्॥ ॥इति कौस्तुभे प्रथमस्य प्रथ
मे पादे चतुर्थमाह्निकं॥ ॥ईदूदेत्। अप्रायमिति। ईदूदेशो गुणानां तरयुक्तग्रहणं त्वभेद
पक्षाश्रयणेनेति भावः। जातिपरइति। दीर्घत्वव्याप्य ईत्वादे रन्ति रिक्तजातित्वानंगी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊः

२१ ८२

वि·प्र· कार्यमते नेदं। अन्येनेति। प्रगृह्यः प्रकृत्ते त्यनेन। अपेक्षेयेति। तन्मूलकपूर्वत्रासिद्धमिति

१७ न चैवाधापेक्षया चेतिबोध्यं। विशेषेति। विशेषो [illegible] स्यापकवाक्यरूपप्रमाणापेक्ष

या सामान्योपस्थापकप्रकरणरूपस्य दुर्बलत्वात्। शास्त्रासिद्धत्वेति। यद्यप्यंरं गत्वा स्था

त्राप्रवृत्तं तु तच्छजातः द्विमात्रस्य चाभावः। तथापि शास्त्रं न प्रवृत्तमिति बुद्धेः शास्त्रस्या

सिद्धत्वात्सत्वेन स्तुतः बुद्धेरभावात् द्विमात्रबुद्धिरिति भावः। इति स्थिते इति। एकतरपक्ष

एव सकल लक्ष्यसिद्धय इति शेषः। ईदाद्यंतमिति। न च द्वयोः पारार्थ्यात्कथं स्वबंधः। गुण

ः कृता त्मसंस्कार इति न्यायेनादोषात्। महान्प्रधानोपकारश्च कुमार्यगार इति न्यायेनासंख्या

भाव एवेति बोध्यं। अदसो मात्। न च प्लुते इति। प्राग्भूतमगृह्यसंज्ञायाश्चात्विधित्वेन प्लु

ते आनयनासंभवादिति भावः। अप्रवृत्ताविति। तथा च नैतत्संज्ञाया असाधारणं फल

मिति भावः। न्यायादिति। अप्लुतवदुपस्थित इत्यारंभाच्चै। यद्योद्देशेति। कार्यकाले तु प्लुत राम:

प्रगृह्याद्यत्रादसो मादित्यस्योपस्थितिसामर्थ्यात्स्वर संध्यभावः सूपपाद इति बोध्यं। ओ

त्सर्गिकत्वादिति। स्त्रियाम स्तु केन्यादौ दोषवारणं नु संज्ञापूर्वकविधेरनित्यत्वाद्बोध्यं। अ १७

आयादेशप्रसंग इति। परत्वात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एवानुनासिकसंज्ञाप्रणयनं। नाजानंतर्ये इति। उत्तरकालप्रवृत्तिकेऽप्यादावज्ञानं तर्यसत्वान्निषे
धप्राप्तिः। युगपदिति। विप्रतिषेधे परमेवेति नियमादिति भावः। निपात एकाच्। सिद्धकोऽस्याभि
ति भावः। इकः समीप इति। व्यवहितस्यापि समीपत्वान पापाश्विंसमिदं। समीपवाचितशब्दादीनाम
व्यवहितसमीप एव शक्तिरिति न दोषः। अत्रेदं भाष्यमतोल्यांतस्यैस्त्रनस्य भाष्यं च मानं। हे अ इति
दूराद्धूतत्वाविवक्षया वाक्यांतत्वाभावाद्वा न प्लुतः। वक्ष्यमाणत्वादिति। इदमोन्वादेश इत्यत्र। ओ
त्। न प्रवर्त्तत इति। ननु गोभ्यामित्येतद्घटकगोइत्यस्यानुकरणे लोपस्य वैकल्पिकत्वेनाभावे ओत्वनि
ःसुयोजे ति चेन्न। प्रकृतेः स्वादिप्रत्ययस्य तल्लोपस्य च विरहप्रयुक्तगणपदत्वस्यातिदेशेन य
न देते भ्याइत्यादावपि प्रकृतिसत्तावोधनेपि स्वादिप्रत्ययादेर्बोधनस्य कर्त्तुमशक्यतयाऽतिदेशु
मशक्य [redacted] त्वादित्याकूः। विप्रतिषेधेति। न च संबुद्धिग्रहणाभावे ओदंत निपातस्येवैतो विकल्पः
स्या[redacted]दित्यपवादत्वेन विप्रतिषेधोक्तिरसंगता। एवं च निपातग्रहणाननुवृत्तितात्पर्यग्राहकतेव
संबुद्धिग्रहणस्य युक्तेति वाच्यं। ओङ्ग्रहणं कृत्वौङ्ग्रहणानुवृत्त्यैव सिद्धे पुनरोङ्ग्रहणेन तदनुवृत्तिः सि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रीः

वि॰प॰ ड्विति भावः। नचैवमप्याकारव्यतिरिक्ते संज्ञा नाम बाधस्योक्तत्वात्परत्वादित्यसंगतं। ज्ञापकस्य वि
शेषविषयत्वेन संज्ञाभेदविषयत्वात्। इहत्वेकैवसाइति शब्दनिरपेक्षत्वेनांतरंगत्वादोदित्येवयु
१८ क्तमितिवाच्यं। निपातसंज्ञासापेक्षत्वेन समत्वादंतरंगे कृते बहिरंगस्य दु र्वारत्वाच्च। नचैव
मेतदभावे पूर्वसूत्रं दुर्वारमिति वाच्यं। विकल्पस्याभावपर्यंतव्यापारे लोपे तदभावे नित्याप्राप्ते
रित्यन्यत्र विस्तरः। प्रकृतिभाव इति। ईदूदंचादसो मादिति सूत्रस्थभाष्ये लाघिरूढं। ननु उञिति।
उञ्जैकादेशस्त्वनभिधानान्नेति भाष्याशयः। समादधीतेति। आङ्नाङोरेकादेशोपि लाक्षणि
कत्वादेवाप्रवृत्त्यापत्तौ सूत्रवैयर्थ्यमेवस्यात्। सामर्थ्यान्नत्यपरिभाषाया अप्रवृत्तौ तु अदो भव
दित्यादौ दोष इति भाष्यस्याभ्युच्चयतेवयुक्तेत्याशयः। ओदिति। समासएवेति वक्तुं शक्यमिति
चिंत्यं। वस्त्वामइति। प्राधान्येएवाप्रवृत्तौ आदे चउपदेशेत्ति तीत्युपदेशग्रहणास्य वर्णग्रह राम॰
णेतदप्रवृत्तिज्ञापकताप्राकरण्येप्रविरोधइति। उपदेशेएजंतस्य धातोरित्युक्तदर्थानि। अभ्यु १८
पेतेति। उपदेशग्रहणेन लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वमेव ज्ञाप्यते। ननु वर्णग्रह

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेप्रवृत्तिरितिभावः। द्वि अस्य यस्य ले इति। तेनान्यत्रानियम इति भावः। अत एव वसुवर्णैरखदिरांगा
रसदृशे कुंडले भवत इति भाष्यं पस्पशायां संगच्छते। तदापन्ने श्वेतिदिगिति। अत्रेदं तत्त्वं। गोणत्व
मप्रसिद्धत्वं। गौणीलक्षणार्थबोधकत्वं च। तत्रात्र सिद्धत्वरूपं गोणत्वमाश्रित्य नन्यायप्रवृत्ति
स्तु विशिष्टरूपोपादान एव। अत एव संज्ञास्वैशुरादौ पदाद्यभाव सिद्धिः। द्वितीयगोणत्वमा
श्रित्य प्रवृत्तिस्तु पातविशिष्टरूपकपदकार्य एव। पदांतरसंबंध एव गौणार्थाभिव्यक्तेः। अ
त एवा महान्महान्मतः महान्महत्त्वे व वर्त्तते त्वं द्रुयतिदेवदत्त इत्यादौ भाष्याद्युदाहृते सांतम
हेतिदीर्घयुष्मदस्मदोश्चादेशाश्च भवंत्येव केवलविशिष्टरूपोपादानमात्रेप्रवृत्तौ तु नस्य
रितिस्पष्टमेव। केवलपदकार्य एवेति कैयटाद्युक्तमपि चिंत्यं मूलोक्तदृष्टांतागुणप्रसंगा
वृ सर्वथाप्यत्र सभाष्यस्य परिभाषाप्रवृत्तिपरतया व्याख्यानमयुक्तमेव। भाष्ये त्वेवं व्याख्ये
यं। गौणमुख्ययोरिति। अनाडितिपर्युदासात्। इत्यादि वक्ष्यमाणोभिप्रायः। इतरः परिभा
षेयमनेनोपन्यस्तावेतिमन्वानोन्यत्राप्येवं परिभाषाप्रवृत्तिः स्यादित्याशयेनाशंकते। कथं त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि·म· र्हिवाहीकेऽप्यात्वे भवत इति समाधत्ते। अर्थाश्रये इति॰ अर्थबोधकविशिष्टरूपाश्रये इत्यर्थः।
१९ शब्दाश्रये चेति। अर्थरहितशब्दमात्राश्रये इत्यर्थः इति सुधियो विभावयंतु। ननु सर्वस्येव प्रति
८३ पदं पठितानां ग्रहणेऽर्थाधिकाराश्रयणे चानिई अभवत् ई अभवत् इत्यादेः प्रगृह्यत्वानाप
त्तिः। न चेष्टापत्तिः। सर्वत्र त्रिप्रत्ययप्रतिषेधवार्त्तिकारंभेष्टत्वानुमानादित्यत आह। अना
ङिति। शब्दाधिकाराश्रयणादिति भावः॥ ॐ। तदा प्रगृह्यस्येति। न च प्रगृह्यमित्यस्य प्रथमांतत्वा
दादेशो नैव संबंधः स्यादिति वाच्यं। एवं सति उक्तात्रस्य निसंप्रगृह्यसंज्ञक ॐ भावविधाने योग
विभागेन प्रगृह्यसंज्ञाविधानस्य वार्थत्वापत्तेः। नन्वेतत् [illegible] त्वापत्यमेतेन प्र[illegible]गृह्यत्वं तेनतद
पस्यांतरस्यैव ग्रहणादित आह। अस्मिंश्चेति। प्रथमांतत्वमाश्रित्य प्रगृह्यत्वविशिष्टॐ राम:१
आदेशविधावपि विशेषणविधेयार्थिकस्य विशेष्योद्देश्यकस्य कल्प्यमानत्वमेवेति १२
भावः। अन्यथाऽनुदात्तत्वादेर्विशिष्टवानावादिविधानसंभवेन विधेयस्यानुवादत्वला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

भार्थं कृतं। सर्वग्रहणमनर्थकं स्यादित्याहुः। [redacted] दिगिति। प्रथमांतं तया विधेयत्वमेवास्त्विति केचि
त्। ईदूतौ च सप्तम्यर्थे। अर्थग्रहणसामर्थ्यादिति। न चार्थग्रहणाभावे ईदू [redacted] दे द्विवचनमिति
वदीदूदंतायाः सप्तम्याः प्रगृह्यमित्यर्थोपि तौ सोमो गौरी त्यत्र न स्यात्। एवं च ययी त्या [redacted] त्यये न स्यात्। सो
मो गौरी त्यादौ च न स्यात् इति तस्य चारितार्थ्यं कथं सामर्थ्यापवर्णनमिति वाच्यं। तथा सति ईदू [redacted] तौ सप्तम्यं
तौ विसेषवदेत्। ईदूदंतं सप्तम्यंतमित्यर्थे न सर्वसामंजस्यात्। किं च लदुक्तमात्रार्थत्वे ईदूतौ डिरित्येवं वदेत्। जह
५८६ त्यार्थाऽजहत्स्वार्थयोः फलैक्यानुरोधेन संप्रत्यर्थमात्रेत्याद्यर्थस्ये [redacted] चित्याच्च। इदमेव वैलक्षण्यं बोधयि
तुं लघुभूतो पि ईदूदे दित्यत्रैव नैतत्सूत्रगर्भीन्यासो न कृत इत्याहुः। लुप्ते पीति। तथा च मरसीइत्यत्रैव स्यादि
ति भावः। सवर्णेइति। यद्यपीकारांते पूर्वसवर्णे सत्यसतिवा न विशेषस्तथाप्युकारांते विशेष [redacted] इत्याहुः।
आऽऽम्भाव इति। ईदूतौ च सप्तम्यर्थे इति वक्तव्ये ओः सुपो शादेशो सूत्रप्रवृत्ते र्वा धितत्वेन तत्राऽऽम्प्रसक्ति रि
त्याविदे पाठादिति। सुपां सुलुगिति भाष्यप्रामाण्यपक्षात्वात् एआद्युदात्तपाठो प्यस्ती ति चिंत्यमेतत्। त
त्राहि इयाडि यास्व इति नगुर्ष्क मि। लुदाहरणं दत्तं इत्याहुः। तन्न प्रकृतसूत्रस्य भाष्य विरोधात्। तत्र
हि सरसीशब्द एवोदाहृतः। सिद्धांते विशेषाभावादुदाहरणादि कृसेति बोध्यं। इत्यपरितोषादिति। पू
र्वपदग्रहणमुपसर्जनोपलक्षणं तेन वाप्यामिवाचरति वापीयति कृपे इत्यत्राप्यर्थांतरोपसंक्रमात्प्रगृह्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५२

वि॰म॰ त्वंनेति वोध्यमित्याहुः। वाप्यम्बइति। उक्तार्थज्ञापितेपि प्रकृतस्य त्रस्य नुमेवचनसामर्थ्यादेव ग्रहणमावर्थग्र
हणे ये पर्य्येन ज्ञापकस्य शेषित्वमित्यप्यपरितोषो बोध्यः। इत्यादावपि भविष्यतीति। तस्माद्धचर्यादित्तिभाव
२० :। एतेनेतद्भाष्यप्रामाण्याद्दीप्यत्यादीनां सप्तम्येकवचनाभावइति निरस्तं। न चानादिः निम नुहत्यापर्युदासा
नत्ये दशास्यापि प्रातिपदिकस्येव ग्रहणादिह नेति वाच्यं। गौरीत्यादीनामनुदाहरणत्वापत्तेः। सुवंतत्वे नसा
दृश्यस्यव नु कुमशक्यत्वाच्च। मंडूकानुहत्तौ मानाभावाच्च। न च सप्तम्याप्रकृतिराक्षिप्यतेः तो नास्येति वाच्यं
। सप्तम्यंतस्याप्यक्षे[illegible]पापत्तेः। दाधाघ्वदाप्। धात इति। दाधा इत्यनयोः प्रत्ययपयोर्न ग्रहणं। फलाभावा
ता। दाप्साद्धचर्याद्येत्याहुः। दंडः कर्मव्यइति। दंडो नरविभक्तेरश्रुतिः सोत्रीतिभावः। प्रनिदानेत्यादाशिति। आ —
दिनाप्राणिघतिप्रणिदयते इत्यादीनां संग्रहः कृतानामिसुपलक्ष्यणं विकृतमात्राणां। उक्तमिति। दे
रूपत्वाभावान्नेत्यादित्यनोक्तं। दिदर्थमिति। गामादाग्रहणेष्विति परिभाषामंगीकृत्य विकृतार्थत्वम
नेनोक्तं। भारद्वाजीया इति। तापकाश्रयणे प्रतिपत्तिगौरवान्नाश्रावृत्तिरपि अस्वप्रयोजनमित्याशय
:। दाधामेव प्रकृतपइति। प्रत्येकं वाक्यार्थपर्यवसन्नेऽप्रकृतानामेकृतानां च संबंधिनामुपस्थितौ राम॰
प्रत्यासत्त्याऽप्रकृतानां निराकरणे दाधामेवेति पर्यवस्यति। न तु वाच्योयम्। एतेन प्रकृतिशाब्दात्वया
यदाधाभ्यदे विभक्तिविपरिणामइतिपरास्तं। निरनुबंधकेति। समांदितस्यां दोइत्यस्यैव ग्रहणं स्या २०
दितिभावः। तथा च वार्त्तिकमतेप्रकृतिग्रहणे कृतेपि निरनुबंधकपरिभाषाव्यावृत्त्यर्थं गामादेत्यावश्यक

प्रकृतधाद्रूपसंबंधिशब्दत्वात्

प॰१

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

मितिवोध्यं। केचित्तु दाइति सामान्यानुकरणसामर्थ्यात्तन्मतेप्यप्रवृत्तिरन्यथा दोधाइत्येव वदेदि
त्याहुः। नचैवं प्रणिदापयतीति। णत्वस्यासिद्धत्वात्पुकः पूर्वं प्रवृत्तेस्तन्निमित्तभूतघुसंज्ञाया अ
पि फलाभावादप्राप्तेश्च किं घुत्वेपि अनर्थकत्वेन तं प्रति उपसर्गत्वाभावादप्राप्तिरिति शंकाशयः।
तत्रेति। धातूपसर्गयोः कार्यं स्यान्तरंगत्वात्पुकः पूर्वं दाधाइत्यनयोरर्थवत्वेन तं प्रत्युपसर्ग
त्वस्य सत्वाच्च। तत पूर्वमेव णत्वेन तद्रूपफलस्य संभवे घुसंज्ञा तदेतुत्तराश्रयः। नचाकृतव्यूहपरि
भाषया न पूर्वं णत्वप्राप्तिरत आह। पुग्विशिष्टस्यापीति। यदागमा इति न्यायादिति भावः। वस्कृते
स्कपुकि कृते पुको दारूपां तावयवत्वेन दाहेत्येणात्पुग्विशिष्टस्येव घुसंज्ञेति न कश्चिद्दोषः। अनिदा
रयतीत्यत्र तु न रेफं समुदायावयवप्रतीतौ न तद्ग्रहणेन तद्ग्रहणम्। यदागमा इत्यस्य च यमुद्दिश्यागमो
विहितास्तद्ग्रहणेन गृह्यन्त इत्यर्थः। इदं चैतत्सूत्रस्थभाष्यादिप्रामाण्याल्लभ्यत इत्याहुः। उभयमते
पीति। भाष्यमतेपि प्रयोगस्थानामेवानुकरणात्। अन्यथा णत्वविधायके प्रकृतिग्रहणापकर्षे
णवार्त्तिकखंडनेन न संगच्छते। आत्वायोगादिति। तथा चावदातं मुखमित्यत्र तत्वापत्तिरिति भाष्यं
। नच तर्हि दारूपाभावात्पुत्वाभावेन कथं तत्वापादनं। दोदद्घोरिति घेट निहत्सामर्थ्याद्याग्रहणाद
नुबंधप्रयुक्तोपदेशेजंतत्वाभावेप्यात्वप्रवृत्तिरिति ज्ञापनादित्याहुः। इत्याहुरिति। एवं सति व्याप्तिहार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यू

इतिव्यर्थम्। मेङोऽप्रतीहारादन्यत्राप्र[illegible]त्तेः। तस्मात्प्रतीहारेण नित्ययोगान्मेङ एव ग्रहणमिति कैयटे
वि.म. क्तमेव युक्तमित्याहुः। अतएव ज्ञापकादस्य प्रतीहारा[illegible]न्यत्रापि प्रवृत्तिरिति तु तत्त्वं। ताभेवेति। व
२१ र्लग्रहणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्ताविदमेव नियमसूत्रं [illegible] ज्ञापकमिति भावः। अनु
वर्त्तयतीति। इदं च ज्ञापकं वार्त्तिककार[illegible]मते। तेनैजं तस्यानभ्युपगमात्। भाष्यकृता लववद्गत
सिद्ध्यर्थं एज्निमित्ते प्रत्यये विवक्षिते ऽत्वमिति सूत्रेण ज्ञापकत्वं संभवतीति वक्ष्य। अतएव न
मन्यते इत्युक्तं। केचित्तु उपदेशे य एव चूतदंतमिति व्याख्यानेन पकारलोपे भविष्यतीति· उपदेशे यदेजं
तमिति व्याख्याने आह। अपवेति। भाष्यव्या· चरमुः। आद्यंतवदेकस्मिन्। दिगिति। दरिद्रातेरिवर्णा
त लक्षणस्याचोऽ[illegible]भावोऽप्येकग्रहणस्य प्रयोजनमिति ध्वंसनाशस्त्रे कैयटः। विशिष्टाभाव इति। किं
चैतत्कुरुतीत्यादिवग्रहणेऽतिदेशश्चेदेकग्रहणे कृतेऽपि समासे न यणस्य वारणमित्यपि दूषणं बो
वच४ ध्यं। द्विरुक्तेति। अर्त्तेर्द्वि[illegible]नादेशो बाधापत्तेश्च। व्यवहार इति। वृद्धिंकल्पितन्तत्संदेशद्वितीयाश्रयः पार४
प्रथमव्यपदेश इति भावः। धात्ववयवत्वं अ[illegible]नंतप्रयोगविषयस्य पचेरिदं प्रयुज्यमानरूप राम:
– मवयववद्भावाभिप्रायेण। एवमनेकप्रयोगविषयस्येणः एको यमिकार इत्यनुपपत्त्या विकल्पेनापि
बोध्या। पद्यमिति। यमरमनमामित्यत्र लादेरपि इटो विधानात्सिन्नयामिदमिति कश्चित्तन्न। रु २१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दादित्यइति सूत्रे बलादेरित्यस्य संबंधसत्वेन मत्वेपि संबंधस्यैव न्याय्यत्वात् । अतएव समस्त मेभाष्यकृता ए
काचस्तौ बलीति चैसुक्तं । कैयटेनेति । उरणमपरइति सूत्रे भाष्येवं । अनर्थकस्येति । नानासमुदायानर्गतानि
र्थके कारसमुदायस्याप्येकइकारस्ताद्दशो वयव इति । किंच यद्यपि अपदेशिवद्भावेन सिध्यति तथा
पि गौणत्वान्नेति पक्षस्याश्रितत्वात् प्रतिसूत्रारंभ इति पूर्वग्रंथस्य विरोधः कैयटस्य । कुरुते इत्याद्यर्थमनयाऽ
श्रितं प्रत्यावश्यकत्वादित्याहुः । नरइति । दृधातोरपि गुणेरूपमेतत् । साहचर्येणेति । प्रत्ययाप्रत्यययो
रिति परिभाषया चेत्यपि बोध्यं । अप्रथमेति । अप्रत्यययोपि घुसंज्ञायां तत्साहचर्याद्रूपकल्पयोरप्र २६
त्यययोरपि ग्रहणं स्यादिति भावः । सुसुपेति । पूर्वपदस्य तत्सदृशो लाक्षणिकत्वेन सामानाधिकरण्याज्ञ
रतीवाकृति [illegible] जेरदाकृतिरिति वत्स्त्रियाः पुंवदिति पुंवद्भावो न । जातेश्चेति निषेधात् । उपमानानीति
समासस्तन्न । आकृतिशब्दस्योपमेयवाचकत्वेपि साधारणधर्मावाचकत्वात् । साधारणधर्मो यत्र संदृष्टस्तथा
दिना आकृतिरवयवसंस्थानं । महिषीशब्दश्च महिष्याकृतिसदृशे लाक्षणिकः विशेषणमित्यस्यापि न [illegible] वृत्तिः प्र
। तत्र कौंडिन्यन्यायेनोपमानव्यतिरिक्तस्यैव विशेषणस्य ग्रहणात् । उपमानसमासेत्र च पुंवत्कर्मधारयेत्यस्य दु
र्वारत्वाच्च । उपमानसमासेपि कर्मधारयांगीकारात् । अतएव मृगचपलेत्यादौ पुंवद्भावः । दर्शनीयापतिरित्या
२३ दौ लक्षणासत्वेपि न पुंवद्भावः । कृतौरत्तेः आकृसमानाधिकरणे एवतत्प्रवृत्तेः । अत्र च व्याख्यानमेव शरणमित्या
हुः । स्वार्थिकत्वादिति । तत्वं च प्रकृत्यभिहितार्थद्योतकत्वं । तथा च प्रकृत्या सामानाधिकरण्यं स्पष्टमेव । स्वार्थिकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यादीनामप्यग्रा

।नातिति।१

वि॰म॰ प्रकृतित्वो लिंगवचनानीव वचनात्स्त्रीत्वं । पृथ्वीसमासांतरस्य पुंस्त्वाद्येति भावः । बहुगणेति । वतुसाहचर्याच्छ्रुति
रूपितद्धित एव न तु यातेर्डतिः प्रत्ययत्वयोंतस्यार्थवत्त्वं पदत्वात्सिद्धादाह । उत्तरपद इत्यर्थ इति । ओतावदा । उ
२२ दात्तत्वं स्यादिति । कुत्सुपो नमस्मिन्नस्याश्वाभोरिति भावः । कथंचिदिति । वस्तुतः स्वतन्त्रमते दर्शन्यपदानुवृत्तेस्तत्र
सत्वेन कथंचिदिति । अत एव बहुविशेषसिद्धे सर्वस्यपदसार्थकम् । तत्फलं तु लाक्षणिकत्वसम्पादनमेव ।
णग्रहणं तु विध्यंतरबोधनद्वारा परस्परेण नित्यत्वज्ञापनार्थम् । तेन दुर्भवा निरित्यादि सिद्धमित्याहुः । एतग्रहण
मिति । पूर्वत्रासिद्धीयमद्वित्वे इत्यनभ्युपगमेदम् । केवलं तु । उपलक्षणस्यापीति । यत्र किंचिद्बोधि स्यंवर्त
मानतया प्रतिपाद्यते तु दानवद्धि विशेषणत्वेन स्वविद्यते । यदा तु अवर्त्तमानतया तदोपलक्षणत्वमिति बोध्यं ।
॥ ॥इति श्रीशब्दकौस्तुभे विषमव्याख्यायां प्रथमस्य प्रथमे पञ्चममाह्निकं ॥ ॥सर्वादीनि । बहुव्रीहिश्च
मिति । सन्नर्थः सप्तार्थः सप्तम्यर्थो वा कृतः प्रथमार्थस्य विवेकाष्टः । कंठेकाल इति तु ज्ञापकात्साधुर्बोध्यः । किंच
यदि प्रथमार्थे बहुव्रीहिस्तदा संख्ययाव्ययेत्यादि चतुःसूत्री अनर्थिका । अन्यपदार्थे इति चेत् । तर्हि सन्नर्थोऽपि
न प्रथमार्थकः पंचम्येव इत्यस्य प्रवृत्तिः । किंचोक्तस्य रथस्यायमिति विग्रहे करणेऽन्यपदार्थे नियमतो वहन राम॰१
कर्तृत्वादि न प्रतीयेतेति दिक् । किंच को देवदत्त इति प्रश्ने चित्राणां गवामयमित्यस्यानुत्तरत्वं चित्र
गुरित्यस्याप्यनुत्तरत्वोपत्तेरिति कश्चित् । पदविधिभिन्नेष्वपीति । समर्थसूत्रस्य पदत्वसंपादको विधि २२
रत्नकृतः :पदविधिरित्युक्त्या कर्तृकरणयोस्तृतीयेत्यादीनामपि ग्रहणं । सामर्थ्यं चेतराणेतरापेक्षमिति । नेनेतरनि

लि॰१

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रपेक्षे व्रीहिभिर्यवेष्वयागसिद्धिः। इतरच्च स्वसजातीयमेव गृह्णते तेन दंडेन चक्रेण घटं करोतीत्यादीनां
नासाधुत्वेति तदाशयः। अत्रेदं वक्तव्यं। आवृत्तौ मानाभावः। गार्ग्य इत्यादौ प्रत्ययविधेः पदत्वसंपादक
त्वाभावेन तु कार्यकपरिभाषाप्रवृत्त्या चेतरनिरपेक्षप्रकृत्यर्थस्य च प्रत्ययार्थेन्वयानापत्तेश्च। यथार्क
थे चित्यदविधित्वाभ्युपगमे तु व्याकरणशास्त्रस्य तथात्वेन पदविधिरित्यस्य वैयर्थ्यापत्तिरिति दिक्। सर्वा
त्या५ मिधानसामर्थ्यमिति। आधान्मनेनेदं। संज्ञित्वमिति। तच्च न कृत्स्नादिसाधारणं। सर्वादीनीत्यनुवादवैय्य
र्थ्यापत्तेः। प्रसिद्धेन। बुद्धिस्थत्वेन। उक्तत्वादिति। उपसर्जनप्रतिषेध इति वार्त्तिकेन संज्ञाक्षिप्तस्य विशेष्य
त्वादुपसर्जनस्योपसर्जनानां तस्य च प्रतिषेधः कार्यः। न त्वस्याख्याने सर्वार्थप्रतिपादकस्य [illegible] सर्वार्थप्रतिपा
दकां तस्य च संज्ञेत्यर्थो न्यदो महत्याहुः। अत एवेति। अन्यथोपसर्जनत्वनात्वाभावे हल्ङ्यादिलोपेनैव सि
द्धौ नद्वे[illegible]यर्थ्यं स्यादिति भावः। अपरितो[illegible]दिति। संज्ञाभूतानि। धारणाद्व। आचारछिवं तत्प्रकृति
कविजंताघवारणाच्चेत्यपि बोध्यं। यथाति ङ गोत्रादीनीति। तिङः परे षां गोत्रादीनामनुदात्तो भवतीति
सूत्रार्थः। अयं भावः। गणपाठसामर्थ्येनात्र सर्वादीनामेव सर्वार्थवाचकत्वप्रयुक्त[illegible]कार्यमित्यर्थः। केत्य
ते। न च गणपाठस्य त्यदादीनामइत्याद्यर्थे चरितार्थः। विशिष्टसर्वादिगणपाठस्यैवमपि सार्थकत्वात्। प्रथम
चरमेत्यादिभिरपि सर्वार्थवाचकत्वप्रयुक्तकार्यस्यैव [illegible]विकल्पः। द्वंद्वे चेत्यादिभिरपि कल्पितस्यैव निषेधः। अ

दि॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४९ त्यादिलोपो नस्यादिति। ८

१ (अम्रादिति छेदइति। अइति लुप्तपंचमीकम्। २) पाठो मुख्यः) ३ से ३

वि०म॰ नुवृत्तस्य सर्वनामपदस्य ताद्दृशकार्ये लक्षणा वा। यद्वा ते यांसर्वादिगणत्वदर्शिभाव एव क्रियते। अत्रापि पक्षे
गतो [redacted] नाचनिको ज्ञापकस्सिद्धो वा तदंत विधिस्त्येव। इमां कुरु स्थि मस इमानष्टप क्षां तरमाह। अथवाम
२२ यमिति। अकारादिति। लुप्तपंचमीकमेतत्। ग्रहणवलेति। कोरमा मां स्का भाचैव मादिविषयमेतत्।
ओपगवीति। उपगोरयमिति विग्रहः। विहितविशेष [redacted] णेनानोघं। ज्ञापितत्वादिति। इदं चई यस
श्चेति सूत्रे केयटेनोक्तम्। यः सइत्यादौ लोपापत्तेश्चेति। त्यदादीनामिइत्यत्र विभक्तौ चेत्यस्य विषयस
प्तमीत्वेविस्पमेतत्। सुस्युमिति। चित्रायां जात श्चित्र इत्यादिनि र्देशप्रपंचत्वान्नस्य चिन्त्यमेव ज्ञापकमि
त्य७ त्याहुः। अन्यार्थतायाः। अतान्तद्धितोत्पर्थतायाः। स्यात्स्यतीति। अपरेतु ज्ञातिपदिकमध्येपदांतरप्रवे
शस्य कर्तुमशक्यत्वेन तत्साहचर्यात्तथा भूतयोऽस्त्रीवंतयो र्ग्रहणं। न हि घट इत्यादावियद्वृत्तास्त्रुंद
रीमालेति पदांतरप्रक्षेपः कर्तुं शक्यते। सूत्रं तु रम्या गौरीत्यादौ चारितार्थम्। एतेन स्याप्रग्रहणमेता
दृशास्य लेविध्यर्थमेवास्त्विति परास्तमित्याहुः। एकार्थीभावे हि पूर्वपदं स्वार्थोपसर्जनकपदांतरार्थे
उत्तरपदमपि अन्यार्थोपसर्जनकस्वार्थे वर्तते। अत एव अपदस्य राजपुरुषो राजपुरुषो देवदत्त रामः०
स्येत्यपि न भवती त्याशयवानाह। निष्कौशाम्बिरिति। स्त्रीत्वेनायोगादिति। अत एव ग्रामचइति ठकन। इदं २३
च पुंयोगादिति सूत्रे भाष्ये स्पष्टं। स्त्रीत्वप्रत्ययार्थ इत्याशयेन शंकेयं। निष्कौशाम्ब्यादिति। नांतलक्षणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दीर्घः राजवत्. अस्त्रीत्वांशिति। एवं च स्त्रीत्वविशिष्टस्वार्थ एवान्यैनैकार्थीभूत इति तत्त्वां अवयवस्येति। महाशब्दश
ब्दस्य केवलरूढत्वादिति भावः। इति विशेषणादिति। अनुपसर्जनादिति असंज्ञप्रतिषेध इति वृत्त्यनुरोधेनेदमु। लु
मश्चेति. लुकतद्धितलुकीत्यनेन। ततो नित्यमिति। वाग्रहणनिवृत्त्यैवानित्यत्वे सिद्धे नित्यग्रहणमेव योगवि
भागे प्रमाणमिति भावः। एतद्विधीयमानं प्रत्ययान्तरमेव। स्वार्थे तयपोऽप्राप्तत्वात्। एतदंतस्य स्त्रीत्वेन उभयो
गएव. वृत्तिविषय एवैतस्मात्स्यादेकार्थीभूतस्य स्त्रीत्वेनायोगात्। तदाह। नित्यमयजिति। उभयतइति। न
चोभयस्य पाठाभावे ततस्त्रजादिविवक्षायाः कर्तुमशक्यत्वेन वृत्तिविषयाभावात्कथमत्रायजिति वाच्यं.
यद्यत्रायच् स्यात्तर्हि उभयस्य सर्वनामत्वात्स्यादेव विवक्षेति कात्स्न्यनिकविषयतामादाय शास्त्रप्रवृत्ति
ः। अत्र च भाष्यमेव मानमित्याहुः। इहायजादेशस्य। अवयवार्थकस्येति शेषः। गच्छन्तीति। यद्यप्यत्र क्यास पि८
विषआभीक्ष्ण्ये इति पठ्यते तथापि पौनःपुन्यस्य क्रियाविषयत्वात्प्रसिद्धत्वाच्च गतेरेव ग्रहणमिति भावः। उत्त ५८
रउत्तमो. पित्वाद्न्तोदात्तो। प्रयोजनाभावादिति। संज्ञाप्रयोजकान्वर्थत्वं अल्पस्य सर्वार्थवाचकत्वाभावादित्य
त३ र्थः। वेदमाप्येइति। त्वशब्दोपरविभक्तेरपि त्वआदेशः सुंवच इत्यत्रापि। चित्। तच्चित्त्वमिति। चित्ता वीजं तु त्रातित्व
घनत्वातिरिक्तप्रवृत्तिनिमित्तेन त्वे त्वशब्दो वाचको भवतीत्यर्थेला भार्थं तथा पाठ आवश्यक इति। स्व
स्त्रेति। यद्यपि नपुंसके त्वे पि सर्वनामसंज्ञाविकल्पसामर्थ्येन परं द्विभावं बाधित्वा जसः शीत्व [redacted]

पूर्वम्   एव४
तः
र्थस्य कल्पयितुं शक्यत्वेन तु त्वकल्पनेन न किंचिन्मानं। तथापि शास्त्रबाधकल्पनाया लघीयस्त्वमिति भावः। अत्रैवा
वि॰म॰ नुकूलं [redacted] र्कमाह। अत एवेति। त्रिसूत्र्यां॰गतासूत्र्यां। त्रिसूत्री॰अष्टाध्यायीस्था। जसि विभाषेति। प्रथमचरमेत्यनेना। शी
२४ स्मात्तस्मिन्। स्मिन्न इतिपाठः। नगराभ्यन्तरेति। बाह्येन प्राकारादिना युक्तत्वादिति भावः। त्यदादीनि सर्वैरिति। द्विपर्य
न्तानामेवेति नियमस्तु त्यदादीनां [redacted] त्यतद्धि [redacted] विषये इति भावः। न त्वत्र समासस्त्र व इति। असमासवद्भाव एव पूर्व
पदस्थसुपः सुविधानात्तस्य च प्रकृते दर्शनेन च कुल म प्रहणे न तदभावकल्पनात इति भावः। विभागस्यासिद्धेरिति।
अयं च प्रकारोऽकृतव्यूहपरिभाषया सुटोऽनिवृत्तये। कप्रत्यय इति। एवं च कुमुचितः। न च नपुंसके एकात्कुलादि
त्यस्यानापत्तिः। घञजपाः पुंसीति वचनादिति वाच्यं। तस्य भाव घञादिविषयत्वादित्याहुः। विभाषादिकस
मासे। अतिभवकानिति। अत्र घत्वे किं के एकार्थीभावकल्पना [redacted] त्यू वैमकचू। न हि द्वन्द्वे तेरिति। एकार्थीभा
वकल्पनातः पूर्वमित्यर्थः। द्वंद्वे च। पुंवद्भावस्त्विष्यत एवेति। नन्वविशेषेण पुंवत्वे परवल्लिंगतायामपि समुदा
योत्तरभावाद्विनश्यते ते चेन्न। समुदायादतिदेशो नोत्पन्नस्य टापः श्रवणे नोपपत्तेः। समुदायस्य तु न पुंवत्वं
४वा दृतिघटकताभावात्सर्वनामघटकताभावाच्चेत्याहुः। आख्यानादिति। न च सर्वनाम्नोऽविहितत्वे नौपितदंता रामः
द्विहितत्वमस्त्येवेति वाच्यं। विधानात्पूर्वमंगत्वाभावेन तस्य विशेष्यत्वायोगादित्याहुः। इति स्यादिति। नेमस्य
तु नेमके नेमकाइति भवत्येव। स्वरादिनिपातम्। एका चा विति। अव्ययसंज्ञायां सत्यां महासंज्ञाकरणसामर्थ्यात्के २४
वले कृत्वाभावात्संज्ञाविधावितिनिषेधं बाधित्वा तदंते संज्ञाप्रवृत्तिरुचिता। निपातसंज्ञायां तु केवले प्रत्ययत्वम्
पि१

पफलस्यासंभवात्संज्ञाविधाविति निषेधबाधेमानाभाव इति भावः। षट्कत्वादेस्तु लिंगसर्व
नाम नपुंसकताश्रयेण विभक्तिलुगिति आहुः। न सिद्ध्येदिति। योगविभागेन पाठवि -
शेषणत्वे प्रमाणाभावश्चेत्यपि बोध्यं। तिङ्गोत्रेत्यत्राभीक्ष्ण्यपशब्दस्य पूर्वनिपाता
करणमेव तथेत्याहुः। [illegible] नवेति। सप्तमे हरदत्तस्वकेशं तनु प्रणीतत्वमाह। उपसर्जनेर
ति। स्वरादिभ्य आचार्येप्रकृति कक्किवंतेभ्य उपसर्गेभ्यः प्रसंगस्य सत्वेनाचिंत्यमेतदि।
तस्मादन्वर्थसंज्ञाश्रितममस्यापि विशेषणत्वानन्दं तिविधिर्न्यायप्राप्त इत्येव तत्त्वं। यद्वा। अन्वर्थ
संज्ञाप्रयोजनत्वेन भाष्यकारोपन्यस्तानुच्चैरसौ इत्यादिप्रयोगात् लोपकामिमसाशयः॥ त्वं
अथाहस्पुदाहरणमिति। यया सा वयसा इवैति देदर्श नादस्या मयप्त्वं चिन्त्यमित्याहुः। अ
न्ययेऽयास हृदं नममेति कल्पसूत्रेषु साधागा च। राजाविति। राजिशेषे इत्यर्थः। तद्धितश्चा
सर्व। तद्धितान्त इति। ननु केवले संज्ञायां प्रयोजनाभावः। नचाकचु। प्रातिपदिकात्संज्ञा हु वं२
तद्विधानात्। लुगप्यमयादिहितस्यैव। न तु परस्य। नाव्ययेत्यादौ स्वरोपि पूर्वपदस्यैव। किं

अमयादिरूपइत्यर्थः। एकवचनमेवौक्तीति

ता

वि.म. चकेवलेसंज्ञायामसर्वविभक्तिपदसामानाधिकरण्यासंगतिः। अतोमहासंक्षिप्तशब्द
२५ रूपंप्रतितद्धितस्यविशेषणत्वान्नदंतविधिरित्याशयः। यदिवाएकवाक्यत्वेस्ति। विभिन्न
देशस्थानामप्याकांक्षावशात्कर्मणिद्वितीयैकवचनमित्यादिरीत्यापदैकवाक्यत्वेइत्य
र्थः। एवंचान्यत्रविधायकस्यैवाभावइतिभावः। सामान्येति। द्वितीयाकर्मण्येवानान्यत्रे
त्यादिरूपइत्यर्थः। एकवचनमेवेति। अत्रपक्षेद्वित्वेप्येकवचनंप्राप्नोतीतिदोषः। सामर्थ्या नी५
चेति। [redacted]वक्तव्येऽप्राप्तप्रातिपदिकार्थेस्यपिवोध्यं। सानिवार्यते। अत्रापिप्राति
पदि[redacted]कार्थस्याक्षतेरितिभावः। तृतीयइति। अत्रापिपक्षेवैषम्येप्रमाणाभावइत्यपिदो
षः। साधारणंदोषमाह। त्रिष्वपीति। कुम्भेजंनः। उत्पत्तेरिति। अतएवतुनाकच्। अतएवभा
ष्योक्तपक्षयोर्नफलभेदः। सत्वंवाविनामिति। एवंचप्रतामो इतिआदेदोषापाद स्पष्टः
नंचिंत्यमेवेतिभावः। कुंभकारेप्यइति। असत्वंवाविलाभावादिदंचिंत्यं। सूत्रंतुवक्ष्येएव २५
[redacted]इत्यादोचरितार्थमित्याहुः। वहिरंगेति। एतेनसंनिपातपरिभाषयालोपाभावेप्यव्य

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यानां भ्रमात्रे इत्या धयेद् त्यादौ दुर्वारम्। आ श्रेहे आ धेद् इत्यादौ कथं च दुर्वारं रत्स पास्तं। मका
रसाहचर्यात् ह्रि भक्त्यानि मित्तकस्येका चोग्रहणाच्च। सत्वांवा चकत्वे नाभ्यपत्त स्पष्टा[illegible] स्वभा
[illegible]वाच्च। क्नातोः सुन्कःसुन्मेजं नद्रूत्वे वस्तूत्रयपि तु मुचितम्। साहचर्येण कृतामेव ग्रहणात्।
साहचर्यानि सत्वज्ञाप[illegible] नायवातत्र इत्याहुः। अव्ययीभावश्च। भाष्यस्वरसादिति। कि
चिन्तुयचेतावत्प्रयोजनं स्यान्नहि नाव्ययीभाव गोमहदित्येवसूत्रयेत्। तत्स्मात्सूत्रस्यैव
कृनिटिलोपादीनि प्रयोजनानीध्येयं परिगणनमिति भाष्यं योजयंति। अनित्यत्वमिति।
अत्रापि विशेष परिगणनार्थं वचनमावश्यकं। लक्ष्यानुरोधेन निर्णये तु प्रतिपत्तिगौरव
मित्याहुः। तप्यतेऽस्तीति। न चाव्ययीभावस्य पुनर्विधानं द्विर्बद्धं सुबद्धं भवतीति न्यायाद्वि
त्यार्थमेवास्त्विति वाच्यं। नित्यग्रहणमात्रात्तदर्थ[illegible]सिद्धेः सूत्रवैयर्थ्यस्य दुरुद्धरत्वात्। सि
द्धेरिति। मुखस्वरनिवृत्तिवदकजादेरपि प्रसंगाच्चिंत्यमेतदित्याहुः। सुडन। धनानीति। ता
नि पश्यतीत्यत्र पूर्वसूत्रं सावकाशं। वाक्यमेदश्चेति। यद्यपि पर्युदासे स्वप्रतियोगिक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वि॰नं॰ भेदयतिलक्ष[illegible]णा स्येवतथाप्यत्र ह्रुपं वोध्यं। भिन्नेपि न अः शक्तिरेव। अतएव घटः प
२६ टोनेत्यादावभेदबोधइत्याहुः। नवेति। अनन्वयप्रसंगइति। यथा द्वित्वशब्देनशक्त्या
आदेश्चतुपस्थाप्यंते नहितद्वद्त्रविभाषाशब्दो निषेधविकल्पयोः संकेतितः। किंतुअर्थ
एवेतिशंकार्थः। समाधानंतुस्वयाभवाभलसंवंधेनसंज्ञिनउपस्थितौ संज्ञापदंलाक्ष
णिकम्। सचपदार्थेति। लोकेऽर्थःप्रधानंशब्दो विशेषणं। शास्त्रे स्वंरूपमिति परिभाषणाच्छ
ब्दःप्रधानमर्थो विशेषणं। गुणप्रधानभावविपर्ययएवपदार्थविपर्यासः। इदमेवभाष्ये
प्रच्युतइतिप्रच्यवनंनाम। यद्वा सर्वशक्तिमतः शब्दस्य नाशक्तिः परिच्छिद्यते इति प्रच्यवनं।
साचलोकेशब्दे। शास्त्रेत्वर्थे इति विशेषः। यद्वा भिन्ना एव शब्दार्थपदार्थकाः शब्दा इति।
(कर्ष३ शब्दश्चशब्दयुग्मेषंकः साद्दश्यात्स एवायमिति बुद्धौ निमित्तमित्याहुः। वलीयांसइति। विभु रामः
म्मलकत्वादितिभावः। पूर्वंग्रायडीति नभवतीति। एवंप्राप्तिमात्रेणाप्रत्पविभाषात्वमि २६
तिभावः। समनंतरेति। अपोच्यतेइत्यारभ्य न वेभेतीत्यंतेन। उक्तिसंभवादिति। यडीत्यनुवर्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ धर्मे बहिरंगत्वं सोस्यास्तीति धर्मी त्वनुक्तं गम्यत इति ज्ञापकत्वेनोत्पादयति तत्प्रमाणं स्वत्रं

३२

नात्प्राप्तविभाषा [redacted] तदनुवृत्त्यभावेऽप्युभयत्रेति बोध्यं। धर्मिग्राहकेति।
प्रत्ययोत्तरपदयोश्चेति। भयत्रेति। प्राप्तविभाषात्वस्याप्यनुपपत्तिर्बोध्या। स्थानि
वद्भावसंभवादिति। न चाचि विभाषेति कर्त्तव्ये स्थानिवद्भावाप्रवधात्वं स्यादिति
व्यम्। तमेवाजादिप्रत्ययमाश्रित्य चेक्रियइत्यादावपि वृद्ध्ययादेशवत्तस्या प्रवृत्तेः
सुलभत्वात्। आगुक्तेत्तरङ्गानपीति न्याये तु लुक्शब्देन तदुपजीव्यानामिव तद
पवादानामपि ग्रहणं बोध्यं। ।इति विषमव्याख्यायां षष्ठाह्निकम्। ।।इग्यणः। तदे
व विधेयं स्यादिति। शाब्दार्थसंज्ञापक्षे व्यवदेशः। कारकविशिष्टा क्रियाया धात्वा
तं र्थत्वात्। तस्या एव विधेयं स्यादिति। अर्थस्येवेति। अर्थश्च न क्रियारूपः। असत्वरू
पत्वात्तस्य विधानायोगात्। किं तु तत्कर्त्तृभवनादृगेवेति तत्त्वं। एतेन वाक्यार्थसंज्ञा
पक्षे क्रियाया एव विधानं स्यादित्यपास्तं। शब्दभेद इति। सकृतात्तोच्चरितव्यापारा
व्यवद्वयोच्चारणेऽइत्यर्थः। यथायेन ध्वस्तमनोभवेनेत्यादि। शब्दैकेति। सके

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि·म· तत्वोऽष्टपुटव्यापारात्मकापि तेकथं चेन विनिगमकाभावादनेकार्थबोधे इत्यर्थ
२७ :। यथा विद्वन्मानसेत्यादौ। तादृशव्यापारभेदे तदुत्पाद्यध्वनिभेदे वा यंभेदे केय· आ
वृत्तिः साधिकामिकबोधस्कोदृश्यपत्वे तदीयपुनरनुसंधानस्याव्रजितपदार्थत्वादि
ति विशेषः। यथा मत्स्यास्तिष्ठन्ति गंगायां स्थित्वा पश्य सुरेश्वरेत्यादौ। तं तु कुग
प डुभया न्यया विषय बोधो पीत्याकुः। तन्नापि तेति। एतेन प्रदेशेषु यणादि मित्येव
सिद्धे संज्ञासूत्रं व्यर्थमित्यपास्तम्। नोक्तदोषइति। यथा संख्याश्रवणान्नादु
हीत्यादौ दोषः। निर्देशाइति। फलितार्थकथनमिदम्। वर्णसंज्ञित्वे ष्यङः संप्रसा स·
रणामित्यादिविधिप्रदेशेषु यणः स्थाने इक एवाभवद्विधेयवाक्यानुपपत्तिः। वाक्य
स्य संज्ञित्वे तु संप्रसारणाख्येत्याद्यनुवादघवाचे नवबोधात् दूदूषणमिति तदर्थ क्या·३
:। आद्यनौ। अपवादइति। यथो हेषे चेदं। कार्ये काले तु षष्ठीस्थाने इत्यधिकारस्य साम·
नैतदभावे स्थाने षष्ठी प्राप्ता तत्रास्या उपस्थितिरिति न प्रसत्ययपरत्वापवाद इति २७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पष्टमत्रैव भाष्ये। आ लजाटचाविति। प्रत्ययविधावेऽऽप्रकृते श्विंत्यमिदं। स चोदात्तमिति। पाघ्रेति
सूत्रस्य भाष्यविरुद्धं। इत्यादीति। एवमप्याट्श्वयासु दृष्टा सोपदेशित्यादौ वाक्यार्थानुपपत्तेर्दु
३८ ष्परिहरत्वेन चिंत्य एवायं पक्ष इत्याहुः। भिद चोत्यात्। तत्र भिदिति। भ्रमीत्यर्थः। एतेन जानातीत्या
दौ नुमो मित्वस्य चारितार्थ्यादिदं चिंत्यमित्यपास्तं। अत एव तत्रैसुक्तं। अन्यथोपस्थितत्वाद
वास्य नुमो लाभे तत्र ग्रहणे लावेयर्थ्यापत्तेः। गुणः स्यादिति। इष्क्षौ त्वत्र त्वत्प्राव गुणो भाष्यति प्र
वं विप्रतिषेधेन गुणं बाधित्वानुमि सकृज्जताविति न्यायेन पुनर्न गुण इत्याह। वर्हलिहेति। अ तआ दृ
स्मादिति। सामर्थ्याद्गुणोकृतेऽं। लंपता दृदं। अंगुल्यादिष्विति। अयं बाह्यादिष्वपि भाष्यजिसि
द्ध्यर्थे मित्याहुः। षष्ठीस्थाने [illegible]। निपातनादिति। तत्पुरुषे कृति बहुलमिति बहुलग्रहणादि
ति केचित्। निपातनादित्वमिति। सुब्लुक्यकारस्येत्यर्थः। केचित्तु सुपां सुलुगिति शे भावमाहुः।
अंतरंगत्वादिति। प्रसक्तस्येवानंतर्यादिसंभवात्प्रसंगस्य प्रथममुपस्थितत्वादंतरंगत्वं। अनं
तरादीनां तु प्रतियोगिसापेक्षत्वादंतरंगत्वमित्यर्थः। स्थानिवदिति। अस्मिन्नपि पक्षे ज्ञापक
स्य सजातीयापेक्षत्वाद्विधिविषय एव तत्प्रवृत्तिरिति ध्येयं। एतदर्थमेव ज्ञापको पन्यास इत्याहुः।

ति सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।तात्वादिति७

सर्पः२

वि.म. षष्ठ्यंतमिति। यस्मात्षष्ठ्युच्चारितानदेव षष्ठ्यंतेस्थानेनयुज्यतेइत्यर्थः। आरंभसामर्थ्यादि
ति। परवर्णरंभसामर्थ्यादितिभावः। एवंचसूत्रविरोधस्तत्रपरत्वादेतोभवतइत्यर्थः। तेनाति
२८ रोधादिति। अनेनसहविरोधस्यत्वाभादित्यर्थः। बाधकादिति। इदमपिकार्यविरोधसमावे
४भ शेसंभवति। णेरनिटीत्यादौतुसमावेशोभवत्येवेत्याहुः। स्थाने। यथासंख्यसूत्रंहिशब्दसाम्ये
नार्थसाम्येनवाप्रवर्त्तते। आद्यंयथासमूलाकृतेत्यत्र। द्वितीयंयथा। परस्मैपदानांणलित्य
त्र। प्रकृतेतुशब्दसाम्यंनैव। अनुच्चारणात्। समसंख्यत्वाभावात्। अर्थसाम्यमपिनसं
भवतीत्याह। अर्थतइति। [illegible] अनुवर्त्तमानेप्रसंगवाचि। इहत्वंतात्वादिस्थानवाचीति
-विवेकः। ननुप्रसंगेस्थानतोयांतरतमःसइत्येववाक्यार्थोस्तु। आद्यवाक्यार्थेवाक्यभेद
चमानाभावइत्यत आह। वाक्यभेदचेति। गुर्यादिति। इतरांतर्याभावेनवाग्घरिरित्या राम:१
देःप्रयोजनस्यवक्तुमशक्यत्वात्। एवंचतमप्ग्रहणं इतरांतरतम्यवाधनद्वारावाग्घ २८
रित्याद्यनेनसफलं। सिद्धांतेत्विति। वाक्यभेदाभ्युपगमादितिभावः। अकःसवर्णेदीर्घइतिदै
त्यारिरित्यत्रयासस्य तस्यास्थानीदीर्घांतरतमः। श्रीशइत्यत्रप्रत्येकमितिसिद्धमित्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

देशानुवृत्तिभ्रमवदेशादशाइति चिंत्यमेवेति कश्चित्. दिगिति। तापकाश्रयणे प्रतिपत्तिगौरव
वात् दृष्ट एवायं पक्ष इति कश्चित्. तन्न। इत एवास्वरसादाह. यद्वेति। ३१

दिगिति। यत्रानेकविधमित्यस्यैकैकमात्रांतरतमेष्वाम्नेषु नियामकत्वं न तु सर्वथैव
वसंभवतोपि गुणलक्षणानां न स्वस्य त्यागपरत्वमिति भावः। बाधित्वेति। अकृतव्यूहपरि
भाषयेति भावः। अंगगुणेति। अंगस्य ये गुणाः कालादयस्तेषां प्रधानकालादिभि
र्विरोधे तादृर्थ्यादंगानामुक्तकालबाधनेन कालांतरेप्यनुष्ठानं। यथा सोमका
लेन दृष्टकालस्य। दृष्टेः कालः पर्व। सोमस्यापि सएव वेत्याहुः। आधानश्रयणादिति।
इतो मनुष्यजातेरूढ इत्यादिना विछेदान्मेऽकस्तुति प्रसंगआपर्थः। वक्ष्य
माणरीत्याऽसंविशेष्टमेकदेशानुवृत्तिमेऽकस्तुत्या रावश्यकत्वादाह। किंचे
ति। डीनिति। यत्वनुवृत्तावादिशब्देन गणसत्रस्यैवहृदयागमनं। तत्पक्षे तु अकार
विभागोऽरांतानुकरणत्वं षष्ठीतत्पुरुषो हृदइत्यनेकुर्वाहृदयागमनमिति क्लि
ष्टतममेवदादिति। तन्न। इत एवास्वरसादाह। यद्वेति। वचनेनेति। स्वभावस्य सामर्थ्य

३१ अनुवृत्तावादिशब्देन गणसूत्रस्यैव हृदयागमनं. स्वकृतव्याख्याने तु नरइत्यत्राकारविभागः नरितिरांतः॥
लुप्ताकारानुकरणं. तस्याकारेण षष्ठीतत्पुरुषः विशिष्टस्य चन्द्रशब्देन हृदः इत्यनेकर्षाहृदयारोहः इत्यनुवृत्ति

२कस्से२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰म॰ रूपस्यालिंगतयाऽश्रुतिकल्पनं विनाऽऽश्रामाण्याद्दवश्यंभाविनितत्कल्पनेप्रत्यक्षश्रुता
२९ प्रतिबंधात्स्वरस्येनयोगेनेलघुनोपायेनसिद्धावनेकहृत्तोतानुसरत्वोगौरवान्नेदं
प्रत्यारम्भानं रमणीयमाभातीतिकश्चित्तू। उरल। असंगतइति। एकशेषप्राप्तिरूप
दोषेण। शब्दतइति। प्रत्यापकतः। अर्थतः। प्रत्याप्यतः। नतरामिति। ऋकारस्त्रिंशतः
संज्ञेत्युक्तत्वात्। लक्षणोमिति। त्रिंशत्स्वुशक्तस्यऋकारे[illegible] लक्षणालक्षितेनऋका
रेणत्रिंशतामुपस्थितिरितिलक्षितलक्षणा। एवंचविभिन्नार्थत्वान्नैकशेषइतिभावः। असंगेर
परतो इति। इदंचयथोद्देशपक्षे। कार्यकालेतुगुणवृद्धिविधौप्रमाणतआंतर्यस्याश्रयणमे ना
व। अतएवचैतत्पादेऽइवगुणादिसिद्धिः। अतएवंक्त्रोः किल्करणं[illegible]च[illegible]रितार्थं। प
अतएवचानियमएवप्रामहत्याहुः। एऽवस्यादिति। स्थानकृतांतर्यानाश्रयणेने रामः१
दं। गुणवृद्धिविधौप्रमाणतआंतर्यानाश्रयणेनेतेषामान्तरतआहु। किमेति। सर्वादे
इति। सामर्थ्यादेवोपजीव्यविरोधस्यापिवाधइतिबोध्यं। लोपस्यसर्वादेशत्वऋस्या २९

उ

नीयत्वाभावाद्परत्वं कर्त्तव्यमिति चेत्। पूर्वमुः स्थाने असज्ञामा नस्य लोपस्य पश्चाद्परसुखेनस
र्वादेशत्वमुचितमिति गृहाण। लोपो नस्यादिति। इदं तु कैयटानुरोधेन। वस्तुतो रेफ्भाव [redacted] णमापाद्य
ऌत्वग्रहणापकर्षपक्षे संयोगान्तलोपप्राप्त्यभावात्। ववश्चेत्यादावपीति। वर्त्तत इति भाष्योक्तं तु तन्म ऌं२
ध्यपतितन्यायेन गतार्थमिति भावः। अलोन्त्यस्य। अंत्यस्य [redacted] पदस्ये [redacted] ति। अंत्यस्येव पदस्यस्या
त्.न त्वनङुङामित्यत्रेति कश्चित्। अंत्यस्यापि संपूर्णस्य स्यादिति बोध्यं। निर्दिश्यमानस्येति न्यायात्ः
ऌत् एतेन दस्थाने कालत्वाभावात्सर्वादेशः स्यादित्युक्तिश्चिन्त्येति नारायणोक्तिः परास्ता। भाष्यरीत्याऽ
नेकाल् सूत्रस्येदानीमभावाच्च। न कर्त्तव्यमिति। अलेवांत्यस्य नान्य इति नियमेनेष्टसिद्धेः। पूर्वोक्तं तु
प्रतिबंदीमात्रं न वास्तवमित्याह. वस्तुतस्त्विति। परत्वात्सर्वादेश इति। एवं तातङः सर्वादेशत्वं न स्यादि
त्यपि बोध्यं। तदपि हि परत्वेनैव साध्यते। ~~[illegible]~~
~~[illegible]~~मिति। ङिच्च। तातङीति। गुणवृद्धिसंप्रसा
रणाद्यर्थ ङित्त्वे इति शेषः। अनंतरमिति। एतस्यानुवृत्त्यर्थमत्र पाठः। उपपत्तिरिति। एवं च लाघवान्
ङिच्चेत्यस्य तत्तन्ङकारोच्चारणसामर्थ्यलाभार्थाद्नुवादकं तेति लाघवमिति भावः। अनेकाल्। नस
र्वादेशतेति। गुणस्येत्यादिः। इति पक्षे इति। अत्र पक्षे आदेशसंबंधात्प्राक् प्राप्तापीत्संज्ञा प्रयोजना

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावान्नक्रियतेइतिज्ञापनप्रयोजनमस्तीति भावः। अंतरंगतयेति। उपदेशेऽस्य स्वसाक्षात्प्रधान
वि॰म॰ क्रियान्वयउचितइतिभावः। दिवओदिति। तस्योच्चारणार्थत्वाच्चिंत्यमिदम्। चिंत्य[redacted]ति। पूर्वफला
भावादनंतरमुपदेशकालाभावाच्छादीनामित्संज्ञानस्यादित्यभिप्रायइतिभावः। एवं चाशिग्रहण
३° ति मावश्यकमिततत्वं। अकर्तुमिति। इहेतिशेषः। उत्तरसूत्रेफलंतुस्फुटमेव॥ ॥इतिशब्दकौस्तुभेवि
षमव्याख्यायांप्रथमस्यप्रथमेसप्तममाह्निकं॥ ॥ॐ॥ ॥स्थानिवत्। भवमिति। यद्यपिभ्वा
दिगणपठितताक्रियावाचकताचास्योपदेशेनापिसिद्धं धातुत्वं। अव्ययेति। परत्वात्कदादे
शेचिंत्यमेतत्। अंतरंगत्वंतुदुरुपपादं। नित्यताप्रकदादेशएव। नाजानंतर्यइतिनिषेधाच्च।
शा तुगभावापत्तेरिति। तस्मात्प्रक्रियादर्यांजहत्स्वार्थावृत्त्यभावोमतएवंगतिवीभ्रयणीयेति
भावः। परत्रेति। अन्यत्रेत्यर्थः। वेफल्यापत्तेरिति। अत्रापियोगविभागेनलुङ्लङोरेवेतिनिय
मार्थत्वाल्लिटिनित्यतायाः फलस्यसत्वाच्चचिंत्यमेतत्। अतआहन्अस्तीतिप्रायेणेति। अतिदे
शसूत्रागामि[redacted]हपाठस्तुषष्ठीपदानुवृत्त्यर्थइतिस्पष्टं[redacted]सनाद्यंतसूत्रेभाष्ये। परिभाषा शीतङ
णांगुणवृद्धिनिषेधानांचपाठात्। सिद्धंधर्मिणमिति। सिद्धंधर्मिणंपूर्वमुच्चरितंकृत्वाअन्यो रामः॰
विधेयइतिन्यायः। आदेशः स्थानिवाप्रइत्यर्थः। स्थानीआदेशबोधकइत्यर्थस्थानिनउद्देश्यत्व ३°
आदिनायच्छब्दयोगःप्रथमंपूर्वोच्चारितःसोऽपरोच्चारितःसं[redacted]स्यादि। निवर्त्यादीति। आदिशब्दमपियभिचरि
तंआर्द्धधातुकंशेषइत्यादेः। अस्तुवेति। लोकेप्रकृत्यादिकृतिग्रहणस्येवदृष्टत्वादिदमुक्तमितिकश्चित्तु। रपाठंतर

मित्युत्तरं। चक्षिङः ख्याञ् इत्येवेति। सार्द्धमात्रालाघवमप्यत्रैव भवतीति भावः। तथा च ख्यातिग्रहणसामर्थ्यात् ख्यातेरे
व ग्रहणं न तु ख्यानिन इति भावः। नन्वेवमपि उभयोर्ग्रहणं स्यात् ख्याञ् इत्येव दोषः। एकस्यैव ग्रहणे मानाभावादिति ति२
न। युष्मदस्मदोरनादेशे इति ज्ञापकेन सिद्धे नादेशः स्थानिवदिति। उद्देशेन च क्षिङः ख्याञ् इत्युभयोरपि कार्यला
भात्। इह तु वलकरणाभावेन तद्यानुवादकत्वा नास्ति नवेति विचार्यते। ख्याञ् प्रकृत्य न इति तु सार्वधातुकमात्रवि
षयविषय इति दिक्। वलकरणमिति। न पदान्तेति सूत्रे चैवं संसत्तिसार्थकमित्याहुः। वक्ष्यमाणमिति। इदं तु
वलर्थेनापि सुलभमिति प्राग् उक्तमेव द्रष्टव्यम्। षष्ठीस्थाने इत्यनुवर्त्यार्थे चेत् पाठ इति नाबोध्यम्। निषिध्य
तेति। अतिदेशो तु किं कार्यं निषेधः सिध्यतीति भावः। गाङ्कुटादिति। घुमास्थेत्यत्रापि ङितीत्यनु
वृत्ते र्गाङ्ग्रहणमपि व्यर्थमेव। इदं चोपलक्षणं विभाषोर्णोरित्यादीनाम्। नसंज्ञेति। लिङ्घिघस्त्वेकि
किन्नु लिटि इत्येवग्रहणादिति भावः। सिध्यतीति। न कलं तु देवदत्तः पचनं तु तेनोदनमित्यत्र पदस्यैव धि
कृत्यो यमानो निघातस्तेन यादिश्च। नन्वेतदर्थमनेकाल्सूत्रात् सर्वस्य नुवर्त्यतां किमादेशग्रहणे
नेति चेन्न। आदेशग्रहणं वाक्यभेदेन पुनः स्थानिवद्भावबोधनार्थम्। अनल्विधाविति तु पक्षयोः शेषः।
तत्फलं तु अतिदिश्यमानविरुद्धस्वकार्याभावः। तेनाहन्वित्यत्र प्रातिपदिकसंज्ञा न। स्थान्यादेशीति।
स्थानी आदेशीति मध्यपदलोपी समासः। असंभवीति। घोत्सार्थे नाथ वत्यादिं त्वाम् इदं। दृष्टि सत्र स्यामिति।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि·म· नयादेजितिलुप्तषष्ठीकं। यानीवातीतिनिर्देशात्। केयदेनेति। तदुपपत्तिस्तु सचार्थेयवत इत्यादिप्रागु
क्तैव। विवरणकृतस्तु· षष्ठी [redacted] स्थानेइतिसूत्रमावर्त्तते· तत्रषष्ठीग्रहणं स्थानमुपलक्षणम्। स्थान
३१ शब्दोऽर्थवाची। निष्ठत्वश्चान्नितिश्रुतत्वात्। सप्तमी च निमित्ततायां। योगशब्दश्च प्रसज्यतेइति प्रसत्य
त्याआदेशवाचीतेन स्थानीस्वार्थो [redacted] भिधानसमर्थो मे देशावान् भवतीत्यर्थ इत्याहुः। गणकार्य
मि। यत्तुगणकार्यार्थंकृतः पाठः शपमपिप्रवर्तयेदिति। तन्न। सामान्यविहितशपो देवादिकत्वमपु
क्तश्यनावाधात्। नहि शपूनवगणी भिन्नगणपठितत्वनिबंधनः। अतएव चपादौ गणेनतरुपष्ठितो
नामनुवादइत्याकरः संगच्छते। इदं च वा तत्त्वं वर्त्तनइतिपाठमभिप्रेत्य। यदातुवरणइतिपाठस्तदाऽ
र्थभेदात् भ्वादिपाठेन सिद्धिरयं केवलं। किं च तप ऐश्वर्ये वा इति वत्सदविकरणयोर्द्वयोर्धिकरणे वर्त्तेय
तीतिस्तु पार्थपाठ आवश्यक इति बोध्यं। उत्तराणीति। नासिलसार्वधातुकानुदात्तत्वेन सापितत्वा
दस्य परत्वं। स्वरो षष्ठ्येनेति। तथाहि दावेवायं नतु देवस्त्रीतिभाष्यं। तत्र दयमान इति शपितो स्व सा·म·
तं। रूपनिर्वाहपुरस्तान्मितिफलभेदे प्रत्याख्यानं नसंगच्छेत। नभवतीति। यद्यपीदमुत्वे कृतेपि सिध्य
तितथापि कयि घट् इति न सिध्यतीतिभावः। अनलइति। यद्यपि भाष्येऽनलितिप्रथमान्तमेवप ३१
ठितेतथापितन्नादृतं· अनलात्मकआदेशःस्थानिवदित्यर्थापत्तेः। तथा चल्पे पोऽनलात्मकत्वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्नपक्षे त्वा दाविटूं स्यात्। विशेषानतिदेशे तु प्रदीप्येत्यादौ गुणनिषेधो न स्यादिति भावः। उत्तमैपुरुष
कवचने देत्व स्यस्या निव [illegible] ज्ञाता नार्वा मदत्वं न स्यादित्याहुः। अदो जस्यिरिति सूत्रे त्वग्रहणाद
ज्ञापकान्मादेशसामानाधिकरण्येम विष्यतीति भाष्याशयइत्यप्याहुः। अलगोम्नयणो इति। सकलवि
धिनाग्रहणार्था द्विधिशङ्कासंधानमायो वाध्यते इत्याहुः। वरितार्थत्वादिति। संबंधसामान्यमस्तीव
सिद्धविधिमात्रे निषेधो यथा स्यादित्यर्थबोधना [illegible] द्वारा ऽप्राधान्येनापि अलोप्ययणोर्थाद [illegible] अनुप्रा
स्यादि त्यादौ प्रतिषेधबोधकं विधिग्रहणमेव विशेषातिदेशे ज्ञापकं। तदनतिदेशे तेषामग्रहणप
त्यात्तदेयर्थ्यं स्पष्टमेवेत्याहुः। इत्यंशं चेति। श्रुणदस्य ग्राड्‌सो धितिसूत्रे शिद्ग्रहणमानुमानि
कादेशासंग्राहकं चेत्यपि बोध्यं। तथा चेति। अस्मिन्पक्षे ज्ञापकसिद्धस्यानित्यता मा [illegible] त्रमनेन
ज्ञाप्यते इति तत्वं। नेनगोः पूर्वत्वित्यादि सिद्धमित्याहुः। नकल्प्यमिति। अपचन्निसादेशातिप
दिकसंज्ञानिवृत्त्यर्थे चेत्यपि बोध्यं। स्नुक्रमोरिति। आत्मनेपदनिमित्ते ये स्नुक्रमी इत्यर्थो योमि
प्रायेलोद। सिद्धत्विति। एतद्वचनेनाहि प्रचिकंसते इत्यादौ निषेधो लभ्यते इत्यादिशीत्यातु न लभ्य
ते। तस्मादात्मनेपदेतिमित्ते इति सप्तम्येव। स्नुक्रमोरित्यस्यन्वयायोग्यत्वेनायुक्तःध्वसपक्षइ
त्याहुः। नकश्चिद्दोषइति। ननु कार्यातिदेशे ष्याद्वित्वप्रयुक्ताप्राप्तकार्यसंपादनेन चरितार्थस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि.नं. दित्वप्रकृतीप्रत्ययोर्भयपविरहस्युक्ता प्राप्तकार्यप्रवर्त्तकत्वेमानाभावइतिचेन्न। आदित्वसामान्यविर
हस्य लाघवात्तत्कार्यस्याप्रसिद्ध्यासामर्थ्यात्कार्येमात्रातिदेश इत्याकुः। वार्त्तिकमतेइति। वार्त्तिक
३२ मतेइतिपाठः। मतइतिपाठेतुअयमर्थः। अदीर्घ[illegible]त्वनेनदीर्घमित्नोह्रस्वादिरेव गृह्यते। इस्य
४४ स्यचेरैवाह-सुतामिच्छन्तिति। ज्ञापयतीति। यदिकोलेस्यसुत्यर्थःस्यात्तर्हिएतत्कंलोभादेवलोपो
नेतिकिंहल्ग्रहणेन। आक्षेपलोति। चिंत्यमेतत्। यःसहलात्तवतिप्यामेः। उकार इति। सकार
४६ ह्रयस्येकोहल्स्यपिइत्यर्थः। भाष्यकाशीयसंहितापाठपर्यन्तानुधावनं हल्ग्रहणोपकर्षस्यप्राव
ल्यबोधनेनापिकृतार्थेनसंयोगांतस्यपदांतस्वेत्यर्थेबाधकमित्याशयेनोपसंहरति-तस्मादि
ति। स्थानिवद्भावइति। इलोसत्वंस्थानिवद्भावेआगतंप्राथर्ये-तत्त्वेहंतित्वमितिभावः। प्रकृत्या ४८
दिति। सिज्जिमितांगस्येबोपदेशिकत्वस्यसत्वात्। धातुत्वस्यचनाद्दशास्येवसत्वात्स्थानिवद्भा
वा[illegible]नपेक्षणात् वार्त्तिकेनसिध्यतीतिभावः। शब्दाभावस्यप्रायुक्त्रीत्वासिद्धत्वेपि
तत्वांशप्रत्याख्यानायाह। नायमिति। एतेनलघुल्यपिजनिवध्योरितिवृद्धिनिषेधेनासिद्धत्वा राम:
ल्लुक्त्न्यर्थेनानुधावनंव्यर्थमित्यपास्तं। नचवधहिंसायामितिभौवादिकेनसहद्वित्वस्य ३२
चीष्टतारवधादित्यर्थअदंततात्रयत्नं व्यर्थमितिवाच्यं। गतोचरितार्थत्वात्। तस्यक्ष्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

चित्कत्वाच्च। अत एव हन्तेर्घत्वे त्वप्रसंनियोगेन वधादेशविधानं चरितार्थम्। अन्यथा वधेरेवामुं विदध्या
त्। हनो घत्वस्त्वबाधीष्टत्वाच्च। वधहत्वघप्रत्यया तेनान्तोदात्तस्यापि स्तुलभत्वाच्च। सोपसर्गेपि प्रतिघात
इत्यादौ घञ इष्टत्वाच्च। किंचाप्यमर्थ एव। सिद्धान्तेपि वधशब्दस्यान्तोदात्तत्वेन कृदुत्तरपदप्रकृतिस्वरापू
स्वरयोर्विशेषाभावे घञन्तस्यैव घ्नातादिपाठ दन्तोदात्तत्वमिष्टस्यापि गतिकृत्प्राक्यत्वात्। अस्तु वा सोप
सर्गनिवृत्त्यर्थं तदिति दिक्। यदा वधिर्घीष्टेति। यत्तु वधप्रयोगस्तु निपातनं यदीति निषेधज्ञापनातिङि
ङ्इति निघाताभावबोधनार्थं। बाध्येतेति। उत्सन्नेऽस्य येआदेशे कृते यथा निपातनस्वरः सतिशिष्टत्वा
त्सकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेतेति भावः। नभवति। अनुदात्त एकाच्त्वेत्यर्थः। अदन्तत्वादिति
भावः। किरतीति। अन्यथात्वनो निलान्नित्स्वरेणाद्युदात्तस्य निवर्तनात्। एवं विभिन्नसती स्यादेकाच्
त्वमपि भिन्नपदेश्येनैव बोध्यं। संभवत्येवेति। संज्ञार्थमिति। धातुत्वं तु औपदेशिकमपि वक्तुं शक्यमि
ति भावः। अस्तेर्भूः धातुत्वात्धातुप्रत्यया प्रतिस्त्रोपक्रमयं प्रत्यक्षप्रयोगमनुरोधेन बोध्यः। सीयुडपि
अनेमि निकित्वेन वधेः पूर्वमेवेति भावः। असंभवादिति। यदा वधिर्घीष्टेत्यादौ सतिशिष्टत्वात् … स्वय स्व
रं वाधायेत्यर्थः। वधिर्घीष्टेति। तस्य स्थानिवत्त्वा … भावेद्विति भावः। न च हन्तेः सीयुडि इत्वार्थी विना
प्याद्धातुकस्येनी … नापि सिद्धमतीति तदिष्टासानर्थकापत्ते तत्सामर्थ्यादन्तरंगस्य यधादेशस्य बाध
इ ति शंकापायः। वयादेशस्यान्तेति। स्वेनेति तु प्रत्यर्थीकं। वयादेशेइत्येतत्सापेक्षस्यतस्य समासास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰व्या॰ भवादित्यादेः। विधायकत्वेऽपीत्यादिति। निषेधविकल्पे विधिविकल्पस्य फलितत्वादिति भावः। बहुगु
मानिति। बहवो गावो यस्येति विग्रहे बहौ नेदद्वित्वे तो दन्तो बहुगुरावः। अचः परस्मिन्। सुसा धत्वा
३३ दिति। तापि ते चादितार्थाभावाच्चेत्यपि बोध्यं। तत्र गुणसंभावनायामिति। न चाभ्यासग्रहणसामर्थ्यात्स म२
वर्णदीर्घं बाधित्वा गुणप्रवृत्तेरुक्तत्वात् तदर्थायं ग्रपदं इति वाच्यं। अभ्यासग्रहणसामर्थ्येन दृशसंभाव
नामादायाप्यकृतव्यूहपरिभाषाप्रवर्त्तनदृष्ट्यर्थं ज्ञापनस्येवोचित्यादित्याशयः। अत्रेदं चिन्त्यं। असवर्ण
ग्रहणाभावेऽपि तु रित्यत्रेयङादिप्रवृत्तिसंभावनायाः सत्वाद्द्विनाभ्यासत्वेन निमित्तेन कथं दीर्घ [illegible]
इ[illegible]ति। यदि तु संभावनामात्रेण नेतत्परिभाषाप्रवृत्तिस्तर्हि इयेषेत्यत्र कथं गुणसंभावनया दीर्घ
व्यावृत्तिरिति। असवर्णे यो विधिरिति। यलोपादिसाहचर्येण सवर्णके तेभ्ये इत्यर्थस्येवोचित्यादिति
पदोक्तपरिभाषया ऽनुस्वारादिसाहचर्येण तत्रैव पादिकस्यानुस्वारस्य पयीत्यस्येव ग्रहणाच्च चिंत्यमि
दं। एतेनेति। यणपवादकत्वनिर्णयेन। सवर्णे परे इत्यादिसमाधानं तु चिन्त्यमेव। लोपमालोपप्रा
गेवात्वमिति। यद्यत्रात्वं न स्यान्न हि लोपः स्यादिति संभावनयेत्यर्थः। धर्मिग्राहकमानेन यत्रान्तरङ्गे ग्लः
णबहिरंगनिमित्तविनाशाभावः तत्रैव परिभाषाप्रवृत्तिरिति सीरदेवोक्तं चिन्त्यं। असवर्णे [illegible]ग्र
हणज्ञापकतापरभाष्यविरोधात्। मास्त्विति। सोऽस्त्विति रिति तदनित्यत्वेन तिप्रतीति भावः। सत्तुके ३३
ग्रह इति। अकृतव्यूहपरिभाषानुमानान्तरङ्गे स्थानित्वाद्वेन प्रवर्त्तत इति भावः। तथा चास्मि द्भय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दि~

त्रेष्वनुवर्त्स्यते। असिद्धवत्सूत्राभावे भाष्यकारापातितो हानिवृत्तिस्वरसाधनार्थः अन्यथा ह्यंतरंग
त्वादेशोतदुत्पत्तेः। स्तुकमोरनाम्नेड्त्यादिरिति। आदिनाव्भ्वास्य। प्रत्ययः स्यात्। भू। हु। उभे ऽभ्यस्तं। आ
देशश्च पदेशोऽद्व्यादिग्रहः। प्रत्ययवचनमिति। प्रत्यापत्तिरिति। क्वाचित्कोऽयं पाठः। तद्वमसमादिबाधनार्थमि
ति। सपर्यंतस्येत्यनुवृत्ता विदं। तदनुवृत्तौ तु वमसमादीनां स्यानियतेन प्रत्यमदसत्वात्। अनेनादे
शविधानेऽसाम्हविध्यर्थत्वमिति विवेकः। तमोर्वा केवचनं इत्यत्र सपर्यंतस्येत्यनुवृत्तेस्तद्प्रामेरि
ति भावः। सपर्यंतत्वानुवृत्तिरेवेति। सर्वादेशत्वाभावायसपर्यंतस्येत्यनुवृत्त्यानुवर्त्यं तत्रपर्यंतरंगाश्रा
देशाः स्युस्तर्हि प्रत्ययोत्तरपदयोः सपर्यंतस्य न क्वापि संभवइति। तस्यादेशाविधानमनुपपन्नमिति
तदाशयः। युष्मदस्मदोः सर्वादेशत्वाभावायतद्वमसमादयः स्युर्नित्वरूपार्थमनुवर्तनीयाः तवादीनां प्रस
गेऽत्वार्थः। एवं हि कृत्स्नपर्यंतानुवृत्तिस्त्वयाश्कृततत्कृतमिलापपर्या ल्लुकोबाधकत्वं नापद्यते। ननुश्चत वाघानु
~वृत्तिसहितासपर्यंतात्रप्रत्ययप्रवृत्तोः कश्चिन्नेत्येवं रूपे सिद्धांतेइति। तत्रयदा लक्षणस्य नित्यत्वानित्यत्वावि
चारस्तत्कार्यं न्यायः। यदनुकार्यं पात्स्तदानेति बाध्यं। अस्तु वा सन्नुदूत्येवेति। अत्र वा छत्वादिभ्यः किं त्वा। अ
नभिधानादिति बोध्यं। अन्यथा [redacted] पक्षयोः फलभेदो न स्यात्। यथ्या देशाइति। एवं चादेशरूपसमु
२ दायकार्यनि[redacted]ाव पिआदेशावयवनिमित्तको यणुडुवरद्धतिभावः। वर्णनिर्देशाद्वभावोपीति। स्था
निनिसति यत्कार्यंभावः आदेशोपितद्भावइति। नच कार्यमादेशनिमित्तकं तद्वयवनिमित्तकं वेत्य
स्यदेनत्। लोपवचनसामर्थ्यादिति। यस्येति [redacted] लोपेन सिद्धेरिति भावः। द्विपदिकेत्यादिवार्ति। द्वौ द्वौ पा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

३

सि·म· दीर्घत्वात्सवर्णेधुन·अतएवभ्राष्ट्रायसाधिति।अतएवेत्यादरणनभवतीत्यन्तोग्रन्थःप्रक्षिप्तः।प्र·एदिन्त्वेन
श्रौइत्यस्यसवर्णनामस्थानेसत्वात्वेपिभ्रायसित्यादेरनिरूपितांगत्वाभावात्·भ्राच्याद्यतिस्वर्यते।
३६ तेनाचएवयथादेशःसस्थानेवर्तकूलादेरयत्यर्थः।तेनस्रुत्रादीनांयणादिलोपेगुणेस्पवीयानिसा
दायवादेशः।किंतिषदस्यलोपेऽलोगुणेइतिपरस्पंसिध्यति·स्पष्टंचेदमत्रैवभाष्ये·अन्यथादेतिइ
तहतिहत्यनस्यादिति·नृनिपातिहतिहतिभ्यहतिसनिविकल्पितेहत्वात्·वर्णग्रहणेजातिग्रहणादिति।
प्रायिकीर्णगतइत्यादौदोषाभावमिदम्·वस्तुतस्तुपरस्परस्यगुरुत्वरूपमेवसामान्यंगृह्यतइतिन
दोषः।यद्वा·लघुरेवपूर्वोयस्मात्तस्मादेवपरइतिव्याख्यायतान्नदोषइतिकश्चित्·अल्लोपास्यरत्वा
न्नित्यत्वाच्चेद्ध्वदूत्तिः।नचलोपेएकाचइडनित्यः।यस्यलक्षणोंतरेणनित्यायोपदेशोयदृत्य[redacted]
पिकश्चित्।केचित्त्विति।तत्त्वीकारेह्रस्वविधानविशिष्टस्यादितितन्नामः।परमितिस्याह
चर्यस्यचलोपस्यादिति।एर्थोत्तरस्याहचर्यैणानादिषड्ढेरेवग्रहणेसपियोध्वं।ननुपरेणोवे
५४ तिस्थितमिति।तथाचाकृलो[redacted]गध्वेणनत्वचइतिभावः।अन्यथाहीति।परिभाषाह्यंगीका राम:२
र·प्रत्याख्यानंविरुद्धेतीति।निरपवादाघाःसापवादयोतिदोषः।शास्त्रीयचेति।विल्वकादिभ्य
श्छस्यलुगितिसूत्रस्यःश्येनेयइत्यादावीकारेनिरस्तेतत्सन्नियोगशिष्टनकारोनिवृत्त्यर्थस ३४
न्नियोगशिष्टपरिभाषायाअनित्यत्वपरिश्लिष्टमेव।स्थानिवत्त्वेनासिद्धत्वात्·पूर्वस्मैवेति।ध्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नितं चेदं न वा संयोगस्यापूर्वत्वादित्यादिना भाष्येण। न चाकृतव्यूहा इति। यदि हि यण्स्यात्तर्हि दी
र्घो न स्यादिति तार्किकतया स्येति भावः। स्थानिवत्वेनेति। पिण्णादेशस्य दीर्घस्थानिकत्वेन यणः स्याद
न्यापेक्षयापूर्वत्वेन दृष्टस्य विधेरेवाभावे स्थानिवत्त्वोपसक्तेश्चिन्त्यमेतदित्याहुः। अभ्यासह्रस्व
त्वे इति। इदं चिंत्यं॰ अभ्यासविकारेष्वपवादधिकभावाभावेन पूर्वमेव ह्रस्वस्य जातत्वेन पुनरप्रवृत्तेः
। किंच वार्णादाङ्गं पारिभाषया ह्रस्वत्वमेवोचितं॰ अन्यथा ऊवलुरित्यसिद्धापत्तिः। समानाश्रय
एवासीति नियमस्याप्रयोगकत्वात्॰ यन्नेपथा भूता संबंधियदेकादेशमित्रं कार्यं आगमाग
मिभावस्यास्मादेशिभावान्यतरसंबंधे न यस्तत्संबंध्यंगकार्यत्वं व्याश्रयत्वमिति॰ तन्न॰ भुने
त्यादाववप्रसंगादित्याहुः। पूर्वत्वादिति। वस्तुतो तरंगत्वाच्च क्विलिलोपोपाकृल्पघ्नोपाविति तुलि २८
स्थानिकवृध्याद्यपेक्षमिति दिक्। किं चिअल्लोप इति। किन्तु न॰ अप्रत्ययादित्स नेन वाधात् ऊव
ङीति। इदं च यंगंतात्क्विजित्यभिप्रायेण। लोपो व्योर्वलीति सूत्रस्य स्थानिवत्त्वे धातुता भावप्र
इ.लु तिपादकेषु ग्रंथस्तु नामधातोः क्विजभिप्रायेण॰ तन्मते यणः तथाप्यनिष्टभवत्त्वेवेति बोध्यं॰
अनापत्तेरिति॰ नगधातु विधानुदेशपतावच्छेदकादत्वेनत्वावच्छिन्नेन स्वाभाविकमनादिष्टाद
यः पूर्वत्वेनापि स्थानिद्वारा ऽकारस्यैव वृद्धिं प्रति स्थानिवत्वादित्याशयः। परत्वाच्चेति। न चाट

६६२

